॥ श्रीमद्रामराधाकृष्णाभ्यांनमः॥ अथैकादशीमाहात्म्यंलिख्यते॥ अर्जुनउवाच। एकादशीव्रतस्यास्य विधिंब्रूहिजनार्दन। क्रियते केनविधिना तत्सर्वंकृपयाव
द १ श्रीकृष्णउवाच। कांस्यंमांसंमसूरान्नंचणकान्कोद्रवान् तैलंचमधुरान्नंचपुनर्भोजनमैथुने २ दशम्यांदशवस्तूनिनरस्त्यजतिसंयमी अन्नंपानंचतांबू
लंमैथुनंकेशमर्द्दनं ३ दंतधावनकाष्ठंचहिंसासत्यछलादिकं सर्वंएंद्यूतक्रीडांचत्वेकादश्यांपरित्यजेत् ४ तैलंस्त्रीमधुमांसंचपरान्नंकांस्यभोजनं दिवास्व
प्नंपुनर्भोज्यंपारणेत्वष्टवर्ज्जनाः ५ तिलधेनुसहस्राणिजलधेनुशतानिच दत्वाहर्य्युपवासस्यकलांनार्हंतिषोडशीं ६ तिलभारसहस्राणिकन्यादानशता
निच एकादश्युपवासस्यकलांनार्हंतिषोडशीं ७ विद्यादानसहस्राणिजलदानशतानिच एकादश्युपवासस्यकलांनार्हंतिषोडशीं ८ उपरागसहस्राणि
व्यतीपातशतानिच एकादश्युपवासस्यकलांनार्हंतिषोडशीं ९ कपिलागोसहस्राणांभवेद्दानस्ययत्फलं एकादश्युपवासस्यकलांनार्हंतिषोडशीं १०
परोपकारपुण्येनचातिथीनांसपर्य्यया एकादश्युपवासस्यकलांनार्हंतिषोडशीं ११ अहिंसायाश्चयत्पुण्यंयत्पुण्यंसाधुसेवया एकादश्युपवासस्यकलां
नार्हंतिषोडशीं १२ सतांसंभाषणात्पुण्यंयद्गोग्रासतोभवेत् एका० १३ यत्पुण्यंब्रह्मचर्य्येणचेंद्रियाणांजयेनच एका० १४ वेधनेषुचलनस्यदानंकृत्वाचय
त्फलं एका० १५ संक्रांतौयानिदानानिलक्षसंख्यानिभोजनात् एका० १६ गंगाद्वारेनरःस्नात्वापूजयित्वाचकेशवं एका० १७ केदारेउदकंपीत्वायत्फलंजायते
ध्रुवं एका० कुरुक्षेत्रेकृतंदानंसूर्य्यग्रहसहस्रके एका० २१ जातिलक्षंगृहेयस्यभुंजतिहिदिनेदिने एका० २२ सर्वतीर्थेषुयत्पुण्यंसर्वक्रतुषुयत्फलं मद्व्रते
नसमंपुण्यंनभूतंनभविष्यति २३ गोसहस्रेणयत्पुण्यंदत्वावेदांगपारगे तस्माद्दशगुणंपुण्यंहरिवासरकीर्तने २४ ब्रह्मचारिसहस्रंचयद्वानप्रस्थतोधि
कः वानप्रस्थसहस्रेणभूमिदानंधनंजयः २५ विद्याद्दशगुणंचान्नंसम्यक्क्षेयोददातिवै तस्मादन्नंप्रदातव्यंपुंसानरकभीरुणा अन्नदानात्समंदानंनभूतंनभवि
ष्यति तृप्तिंप्रयांतिकौंतेयस्वर्गस्थाःपितृदेवताः २७ अन्नदानात्परंदानंगोदानंविद्धिपांडव गोदानाद्दशगुणंपुण्यंअश्वदानफलंनृप २८ नरमेधेनयत्पुण्यमश्व
मेधसहस्रकं नरमेधशतेनैवकेदारेतच्चपांडव २९ केदारउदकंपीत्वामंत्रपूतःस्थितोहियः तस्यदेहेत्रयोदेवाःस्थिताविधिहरीश्वराः ३० तेनतुल्योभवेत्
पार्थत्वेकादश्युपवासकृत् एतद्व्रतंमयाख्यातंयत्सुरैरपिदुर्लभं ३१ एतस्यार्द्धपुण्यंतुनक्तस्यैकस्यकौरव एतस्यार्द्धपुण्यंतुएकभुक्तेधनंजय ३२ एक
भुक्तेननक्तेनतथोपवासेनचैवहि तेनराःपुण्यकर्माणःयेकुर्वंतिहरेर्व्रतं ३३ नक्तंचदर्शनान्नक्तंगृहस्थस्यप्रशस्यते यतेर्दिनाष्टमेभागेतस्यरात्रौनभोजनं
हविष्यभोजनंस्नानंदशम्याहारलाघवं अग्निकार्य्यमधःशय्यानक्तभोजीसमाचरेत् ३५ एकादशीव्रतस्यैवपुण्यसंख्यानविद्यते तस्मात्त्वंपांडवश्रेष्ठव्रत
मेतत्समाचर ३६ एतत्तेकथितंसर्वंयज्ञोप्यंव्रतमुत्तमं पुण्यसंख्यांनजानामिकिंत्वंपृच्छसिचार्जुन ३७ अर्जुनउवाच उत्पन्नासाकथंदेवकथंपु
ण्याधिकामता कथंदेवपवित्राचकथंदेवतवप्रिया ३८ श्रीभगवानुवाच पूर्वंकृतयुगेपार्थमुरनामेतिदानवः महाघोरोमहारौद्रःसर्वदेवभयंकरः ३
द्रजन्याजितस्तेनचान्यैःसर्वःप्रजापतिः आदित्योवरुणश्चैंद्रोवायुरग्निस्तथैवच ४० तेनप्रतिष्ठितंसर्वंमुरेणखलुपांडव देवाश्चनिर्जिताःसर्वेस्वत्युग्रेण

परंतप ४२ एवंनिराकृतादेवाश्च चरंतिमहीतले वराकाभयभीताश्चगतायत्रमहेश्वरः ४२ इंद्रेणकथितंसर्वंशंकरायैकमेणवै स्वर्गलोकात्सुराभ्रष्टाविभ्रमंतिमही
तले ४३ मर्त्येषुसंस्थिता देवानश्यंतेमहेश्वर उपायंब्रूहिदेवेशयामरणंचकागतिः ४४ ॥ईश्वरउवाच॥ गछध्वममरास्तत्रयत्रास्तेगरुडध्वजः
जनार्दनोजगन्नाथः परित्राणपरायणः ४५ एवमुक्त्वाययौतत्रसहदेवैर्महेश्वरः अनुजग्मुःसुराःसर्वेसंप्राप्ताश्चहरेःपुरं ४६ ददृशुश्चसमेतावैप्रभुंतंजग
तांपतिं जलमध्येमहासौम्यंवैकुंठंश्रियासहहरिं ४७ ॥देवाऊचुः॥ नमस्तेदेवदेवेशमहासुरविमर्दन दैत्यारेपुंडरीकाक्षत्राहिनोमधुसूदन ४८
सुराःसर्वेजगन्नाथभयभीताःसमागताः शरणंतवदेवेशदानवानांभयंकर त्वंमातासर्वलोकानांत्वमेवजगतांपिता त्वंस्रष्टासर्वभूतानांत्वंचसंहार
कारकः ५० त्वंस्वाहात्वंस्वधाचैववषट्कारस्त्वमेवच त्वंदेववायुरोंकारस्त्वंदेवाकाशएवच ५१ ओंकारोदेवदेवेशत्वमेवगुरुरेवच त्वंशिवस्त्वंचवैब्र
ह्मात्वंरविस्त्वंचचंद्रमाः ५२ हुताशनस्त्वंदेवेशपृथिवीत्वंजलंतथा एतस्मिन्नंतरेकालेनिद्रामुक्तोजनार्दनः ५३ उपविष्टस्तदातत्रप्रविलोक्यचतुर्दिशं
॥इंद्रउवाच॥ नत्वयारहितःकश्चित्दृश्यतेसचराचरः ५४ त्रैलोक्यंजगतामीशत्वय्येवप्रतिष्ठितं स्तुतिंसर्वेप्रकुर्वंतिदेवादानवत्रासिताः ५५
दानवैर्निर्जिताःसर्वेस्वर्गाद्भ्रष्टीकृताःप्रभो रक्षमांदेवदेवेशशरणागतरक्षक ५६ इंद्रस्यवचनंश्रुत्वाभगवान्वाक्यमब्रवीत ॥श्रीभगवानुवा
च॥ कीदृशोदानवःशक्रकिंनामकीदृशोबले ५७ किंस्थानंकोवरस्तस्यब्रूहिसर्वंपुरंदर ॥इंद्रउवाच॥ सर्वमेवमहाबाहोब्रह्मवंशसमुद्भवः ५८
तालजंघजस्तुनाम्नावैश्वसुग्रोहिमहासुरः तस्यपुत्रोहिविख्यातोमुरनामेतिदानवः ५९ एकनेत्रोमहावीर्योब्रह्मणोवरदर्पितः पुरीचंद्रावतीनामत
त्रस्यानेवसत्यसौ देवाःविनिर्जिताःसर्वेस्वर्गलोकान्निवारिताः ६० अस्माइंद्रःकृतस्तेनअन्योचाग्निधनाधिपौ सूर्यचंद्रौकृतोचान्योग्रहनक्षत्र
तारकाः ६१ सर्वमन्यत्कृतंतेनसत्यंशृणुजनार्दन देवलोकःकृतस्त्वन्यःयज्ञाद्याश्चविवर्जिताः ६२ तस्यतद्वचनंश्रुत्वाप्रोवाचसजगत्पतिः ग
च्छामिदानवंहंतुंदेवासुरभयंकरं ६३ इत्युक्त्वासहरिर्देवैर्गतश्चंद्रावतीतदा दृष्टदेवंसमासाद्यजगर्ज्जसमहासुरः असंख्यातबलोघोरोदिव्य
प्रहरणायुधः ६४ देवान्निरीक्षयामासक्रोधसंरक्तलोचनः निर्जितादेवताःसर्वागताश्चैवदिशोदश ६५ हरिंनिरीक्ष्यप्रोवाचतिष्ठतिष्ठेतिदैत्यराट्
तदामयावचःप्रोक्तंमापलायतभोसुराः इत्युक्त्वावचनंतेनचक्रंमुक्तंमहात्मना तेनचक्रेणधारेणदानवास्छिन्नमस्तकाः पतिताभूमिपृष्ठेचमुरस्त
मासुरोस्थितः हरिंनिरीक्षयामासक्रोधसंरक्तलोचनः ६६ दानवोविद्रुराचारः सर्वदृष्टिर्व्यलोकयत् चक्रेणसंक्षयंप्राप्ताविनष्टादैत्यपुंगवाः ६७ ए
कोयंदानवस्तत्ररहितोवैमहासुरः शस्त्रयुद्धंकृतंतेनबाहुयुद्धंतथाधिकं दिव्ययुद्धंकृतंचैवदिव्यवर्षसहस्रकं ६८ विमुच्छितापवलश्चसर्वान
ष्टाश्चदेवताः हाहेतिकरुणंकृत्वासुरसेन्यानिसंययुः विस्मयंप्रापितोदेवोगतोवदरिकाश्रमं गुहांसिंहवतींगत्वातत्रसुप्तोधनंजय ७० योजन
द्वादशमितांएकद्वारांधनंजय तत्रसुप्तोहिदेवेशोभयभीतोजनार्दनः ७१ दानवःपृष्टतोलग्नःप्रविशेमहतींगुहां गुहामुखंदरिंदृष्ट्वाजगन्नाथं

सुदुर्मतिः ७२ प्रोवाच च हरिं स्नात्वा प्रविष्टः कंदरे कथं मारयामि नसंदेहः स्वाऽसुराणां भयंकर ७३ निर्गता कन्यका तत्र हरेरङ्गात् ततः सु
रूपा चातिसौम्या नाम्या दिव्यप्रहरणायुधा ७४ दिव्यतेजःसमुद्भूता महाबलपराक्रमा ददर्श दानवस्तत्र मुरश्चापि महाबलः ७५ नानास्त्रैर्युयुधे
वा महाबलपराक्रमः कन्या च युयुधे तेन कोपदारुणलोचना ७६ स च दैत्यो महावीरो महाघोरः खलोपि सन् तस्याः कोपेन कौंतेय भस्मी
भूतो हि दानवः ७७ निहतो दानवस्तत्र सर्वविग्रहकारकः निहतं दानवं दृष्ट्वा भयोत्कं कन्यकां प्रति ७८ केनासौ निहतो रौद्रः आसुरो दानवो
बली श्रुत्वा तु तत्कृतं कर्म मम कारुण्यता कृता न देवैर्न च गंधर्वैर्न समोऽस्यास्ति भूतले अहं विनिर्जितो येन त्वया सौ विनिपातितः कृष्णस्य वचनं
श्रुत्वा कन्या वचनमब्रवीत् ७९ एकादश्यप्यहं विष्णो सर्वशत्रुक्षयंकरी भीतं प्रसुप्तं त्वां दृष्ट्वा संकटे चागतं प्रभुं ८० निहतो दानवो घोरो यो ल
नस्तव रक्षकः त्रैलोक्ये सुनया विष्टा दानवा येन वंति हि ८१ मयि प्रकुपितायां तेन नवं तिष्ठ नेकशः निहतो दानवश्रेष्ठः किमाश्चर्यमिते विभो
८२ ॥श्रीभगवानुवाच॥ तुष्टोऽहं दर्शनात्तेद्य भीप्सितं च ददामि ते अद्भुतं च कृतो नद्युपकारस्त्वया मम ८३ निहतं दानवं दृष्ट्वा तुष्टाः
सर्वाश्च देवताः आनंदश्च त्रिलोकेषु मुदिता यक्षकिन्नराः ८४ इच्छितं तु वरं मत्तो यत्ते मनसि ते च ते ददाम्य देव संदेहो यो देवैरपि दुर्लभः ८५॥ ए
कादश्युवाच॥ जगत्त्रये सुरेशे विष्णु गोपि चतुर्दिशि अहं तव प्रिया नित्यं मां हरे कुरु मे प्रभो ८६ उपोष्यंति च ये मर्त्यास्तव मत्या जनार्दन स्वर्गस्थि
तिर्भवेत्तेषां यदि तुष्टोसि मे प्रभो ८७ उपवासेन यत्पुण्यं तस्यार्द्धं नक्तभोजने नक्तस्यार्द्धं न यत्पुण्यमेकभक्तकरस्य तत् ८८ सोत्वं संतान हाद्धि स्वभुक्ति
मुक्ती तथैव च एतद्देयं त्वया देव यदि तुष्टोसि केशव ८९ ॥श्रीकृष्ण उवाच॥ एकादशीव्रतं ये वै नरा भक्तिसमन्विताः उपवासं करिष्यं
ति तेषां पुण्यफलं शृणु ९० एकया विधिवन्मोर्च्या एकादश्या सुवर्णया हत्यादिका विनश्यंति सर्वयज्ञफलं भवेत् ९१ सर्वव्रतसमुद्भूतं सर्वदानसमुद्भवम् स
र्वयज्ञसमायुक्तं फलमाप्नोति मानवः ९२ यत्त्वयोक्तं वचो देवि तत्तथैव भविष्यति एतद्दत्तं च ते देवि याचस्व वरमुत्तमम् ९३ ॥एकादश्युवाच॥ वर
मन्नं त्वया चेह मयमेव महावरः एवमुक्त्वा तु सा पार्थ वस्त्रं त्वन्तर्हिता तदा ९४ एवमेकादशी राजंस्तिथीनां प्रवरा स्मृता सर्वपापहरा देवी सर्वोपद्रवनाशिनी
९५ एकादशी मया ख्याता याच द्वादशी त्वयानघ व्रतैर्हार्निर्जपैः पार्थैर्दुर्लभा त्रिदशैरपि ९६ एकादशी तिथिः प्रातर्मध्ये च द्वादशी यदा अंते त्रयोदशी
पार्थ त्रिस्पृशा सा भवेत्तदा ९७ त्रिस्पृशा सा भवेत्पार्थ सहस्रैकादशीसमा राजन् व्रतं कुरुश्रेष्ठ जागरेण समन्वितम् ९८ दष्टाः कालभुजंगेन ये स्वपंति
हरेर्दिने कुर्वंति जागरं नैव विष्णुमायाविमोहिताः ९९ वासरे वासुदेवस्य ये न कुर्वंति जागरम् तेषां व्रतप्रभावस्तु स्वल्पफलं जायते नृप १०० तस्माज्जा
गरणं कार्यमेतत्सत्यं वदाम्यहम् एकादश्यास्तु माहात्म्यं ये शृण्वंति नरोत्तमाः १०१ तेषां तु धनधान्यं च भविष्यति न संशयः विद्यार्थी लभते विद्यां धना
र्थी लभते धनम् १०२ पुत्रार्थी लभते पुत्रान् सत्यं सत्यं वदाम्यहम् सर्वान्कामानवाप्नोति व्रतस्यास्य प्रसादतः तस्मात्त्वयापि कौंतेय कर्त्तव्यं व्रतमुत्तमम्।

॥१०२॥ इत्येकादशीमहिमा॥ अथ सूक्ष्मप्रकारनिर्णयः॥ श्रीअर्जुन उवाच॥ देवदेव जगन्नाथ पापपुंजप्रहारक कथयस्व
प्रसादेन हरे रक्तस्तु निर्णयम् १ कियन्मितायाः स्मर्णायाः वेधाः प्रोक्ता महर्षिभिः कियन्मिते च कृष्णाञ्जि व्रतं प्रोक्तं सुरेश्वर २॥ श्रीभग
वानुवाच॥ न कार्य्या दशमी विद्धा नरैरेकादशी तिथिः यतिभिर्गृहिभिर्वापि पापपुंजप्रहारिणी २ वेधो द्विधा मतस्तत्रांगीकृतः स्मार्त्त-
वैष्णवैः सूर्य्यस्योदयतोऽर्केरुणोदयतः परैः ३ चतस्रो घटिका वेधो वैष्णवानां मते सदा एकाद्याघटिकायाश्च वेधः स्मार्त्तैरुरीकृतः ४ षट्पंचा
शन्मिता स्मर्णा सा ग्राह्या वैष्णवैः सदा एकोनषष्टिप्रमिता स्मार्त्तानां समुदाहृता ५ नवेन्नितिथिः षष्टिघटी परतोपि न वेद्धि सा विवाद एव नास्त्यत्र कर्त्त-
व्योदयकी तिथिः ६ षट्पंचाशन्मितायाश्च वेधो वैष्णवसंमतः एकोनषष्टिघस्याश्च दशम्याः स्मार्त्तसंमतः ७ ब्राह्मे मुहूर्त्ते घटिकामिते वेत्तु केया
दिस्याद्दशमी कदाचित् सैकादशी शास्त्रमतेन विद्धा त्यक्ता सदा स्मार्त्तमतप्रवीणैः ८ शेषायां द्विमुहूर्त्तायां निशायां दशमी भवेत् एकादशी न कार्या
सा हरिभक्तैर्हरिप्रिया ९ कैश्चित्कपालवेधिभिः पंचचत्वारिंशन्मिते काले विस्मर्णाया वेधो ग्राह्यते सत्वयुक्तकः १० यद्यर्द्धरात्रितः प्रातः कालश्चे
वप्रवर्त्तते तदा तत्र कथं स्नानं संध्याकर्मादि त्याजितं ११ अतो न ग्राह्यः समतस्त्वमूलं शास्त्रसंमितैः यत्र चैकादशी नष्टा तत्र त्वेवं विचारयेत् १२ एका
दशी यदा नष्टा द्वादशी परतो भवेत् स्मर्णा विद्धा न कार्य्या सा द्वादश्यां तु व्रतं भवेत् १३ सूर्योदयं यदा प्राप्य दशमी त्रिमुहूर्त्तगा परतो नैव नंदा स्यात् स्मर्णा यु
क्ता तदा व्रतम् १४ दशम्या नवमं प्राप्ते श्रीमन्मधुरिपोर्हिने तत्रैव दिव्रतं कुर्य्याद्द्वादश्यां पारणं तथा १५ त्रयोदश्यां कुरुश्रेष्ठ ये कुर्वंति च पारणम् १
तेषां तु पुण्यं स्मार्त्तिकानां संशयं यात्यसंशयः १६ सूर्योदये यदा नंदा घटिकैकमिता भवेत् व्रतं तदीतमं प्रोक्तं महर्षिभिर्नारदादिभिः १७ द्वादशी च य
दा नष्टा परतोऽस्ति त्रयोदशी त्रयोदश्यां पारणस्य तदा दोषो न विद्यते १८ स्मार्त्तैरेकोनषष्ट्यापि स्मर्णा वेधे च नाग्रहः यतस्तेषां तु द्वादश्यामुपवासनिषे
धतः १९ शृणु पार्थ प्रवक्ष्यामि स्मार्त्तानां विस्तृतं मतम् यस्मात्तु स्थूलकर्तॄणां मुक्तिः स्याच्छास्त्रसंमिता २० एकादशीं परित्यज्य द्वादशी ये रुपोषि
ता तेषां धर्म्मो मतं सम्यक् स्वयंभूपरिवेदनं २१ एकादशीव्रतं प्रोक्तं पुराणैः परमर्षिभिः द्वादशी पारणं नित्यं भुक्तिमुक्तिप्रदायकं २२ एकादशीव्रतं
हंति त्रयोदश्यां तु पारणं एकादशी द्वादश्योश्च फलं तस्य कथं भवेत् २३ एकादशी जीवसमा द्वादशी देहरूपिणी देहो जीवयुतो ग्राह्यो जीवहीनः
स्तु मृत्समः २४ आषाढे मैत्रसंयुक्ता नमस्येश्रवणान्विता पौष्णान्वितोर्जे विशदा द्वादश्यां चाप्यभोजनम् २४ द्वादशीपारणात्यागदोषस्तत्र न विद्यते
स्नानं दानं स्मगमेव प्रोक्तं तत्र महर्षिभिः २५॥ इति श्रीमत्स्यपुराणे एकादशीमाहात्म्ये मार्गशीर्षकृष्णोत्पन्नानामैकादशीकथा संपू
र्णा।१। अथ मार्गशीर्षशुक्ला श्रीयुधिष्ठिर उवाच॥ वद त्वं देवदेवेश लक्ष्मीकांत जगत्पते लोकानां वै हितार्थाय पापानां क्षयकारक १
मार्गशीर्षसिते पक्षे भवेदेकादशी तु या किंनामको विधिस्तस्याः एतद्विस्तरतो वद २ को देवः पूज्यते तत्र कथयस्व जनार्दन॥ श्रीभगवानुवाच॥

साधुसाधुमहाभागत्वंसाक्षदितिकीर्त्तनात् कथयिष्यामिराजेंद्रहरिवासरमुत्तमम् ३ उत्पन्नाकृष्णपक्षेयावदन्त्येकादशींमम मार्गशीर्षस्यराजेंद्र
द्वादश्यांममविग्रहात् ४ मुरस्यवधनात्पार्थपापहाजनवल्लभा कथितातुमयासैवत्वदग्रेराजसत्तम ५ अतःपरंशृणुष्वत्वंमार्गशीर्षसितेतुया यस्याः
श्रवणमात्रेणवाजपेयफलंलभेत् ६ मोक्षानामेतिविख्यातासर्वपापहरातुसा देवंदामोदरंतत्रपूजयेच्छ्रद्धयान्वितः ७ तुलसीमंजरीभिश्चधूपैर्दीपैः
समंततः पूर्वेणैवविधानेननियमंचैवकारयेत् ८ मोक्षाह्येकादशीपार्थसर्वपापप्रणाशिनी रात्रौजागरणंकार्यंनृत्यगीतस्तवैर्मम ९ शृणुराजन्
प्रवक्ष्यामिदिव्यांपौराणिकींकथाम् यस्याःश्रवणमात्रेणसर्वपापक्षयोभवेत् १० अधोयोनिगताश्चैवपितरोयस्यपापतः अस्याःपुण्यप्रदानेनमोक्षं
यांतिनसंशयः ११ एतस्मात्कारणादस्यामहिमानंवदामिते चंपकेनगरेरम्येवैष्णवैःसुविभूषिते वैखानसोनामनृपःपुत्रवत्पालयन्प्रजाः १२ वसंतिबहवो
विप्रावेदवेदांगपारगाः ऋद्धिमंतःप्रजास्तस्यराज्ञोवैखानसस्यहि १३ एवंराज्यंप्रकुर्वाणोरात्रौस्वप्नस्यमध्यगः सददर्शपितॄन्स्वीयानधोयोनिगतान्नृपः १४
एवंचदृष्ट्वातान्सर्वान्विस्मयाविष्टमानसः कथयामासवृत्तांतंस्वप्नजातंद्विजान्प्रति १५ ॥श्रीराजोवाच॥ मयास्वपितरोदृष्टानरकेपतिताद्विजाः
तारयेतितनूजत्वमस्मान्निरयसागरात् १६ एवंब्रुवाणास्तेनरंरोदमानामुहुर्मुहुः मयादृष्टाद्विजश्रेष्ठास्तेनस्माच्चनमेसुखम् १७ एतद्राज्यंमममहत्सु
खदायिनविद्यते अश्वागजास्तथासर्वेरोचंतेमेनमोद्विजाः १८ नदारानसुतामह्यंरोचंतेद्विजसत्तमाः किंकरोमिक्वगच्छामिहृदयंमेवदह्यते १९ तद्व्रततत्पो
योगंयेनैवममपूर्वजाः मोक्षंप्रयांतिसद्योवैकथ्यतांतद्द्विजोत्तमाः २० पुत्रेतुजीवतिमयिवलीयसिमहात्मनि पितरोनरकेघोरेतस्यपुत्रस्यकिंफलम् २१ १
॥श्रीब्राह्मणाऊचुः॥ पर्वतस्यमुनेःराजन्निकटेस्याश्रमोमहान् गम्यतांराजशार्दूलभूतंभव्यंविजानतः २२ तेषांश्रुत्वाततोवाक्यंराजावैखानसोमहा
न् जगामचाश्रुतेत्वैवद्याश्रमंपर्वतस्यच २३ ब्राह्मणैर्वेष्टितोराजाप्रजाभिश्चसमन्वितः आश्रमंविपुलंतस्यसंप्राप्तोराजसत्तमः २४ ऋग्वेदयजुर्वेदसामाथ
र्वणकोविदैः वेष्टितंमुनिभिश्चैवद्वितीयमिवपद्मजं २५ दृष्ट्वातंमुनिशार्दूलंराजावैखानसस्तथा दंडवत्प्रणतिंकृत्वापस्पर्शचरणौमुनेः २६ पप्र
च्छपर्वतस्तंवैसप्तस्वंगेषुनामयम् राज्येत्वकंटकंचैवपरराज्यंविशेषतः २७ ॥श्रीराजोवाच॥ तवप्रसादाद्भोस्वामिन्सर्वत्रकुशलंमम १
भवतोयेषानुकूल्यंकथंतेषांचविघ्नता २८ मयास्वपितरोदृष्टाःस्वप्नेचनरकेस्थिताः कस्यपुण्यस्यसामर्थ्यान्मोक्षंयांतिद्विजोत्तमः २९
अयंमेसंशयःस्वामिंस्त्वत्पृष्टुंत्वामुपागतः उपायःकश्चिदेवात्रकर्त्तव्योमुनिसत्तमः ३० एतद्वाक्यंततःश्रुत्वापर्वतोमुनिसत्तमः ध्यानस्ति
मितनेत्रोभून्तपस्वीब्रह्मसन्निभः ३१ मुहूर्त्तमेकंध्यानस्थोभूपतिंप्रत्युवाचह जानेहंतवराजेंद्रपितॄणांसर्वचेष्टितम् ३२ सर्वज
न्मनितातस्तेक्षत्रियोराजगर्वितः तत्पत्न्यास्तुऋतौकालेपुरजोधर्मःप्रवर्त्तितः ३३ गतोग्रामेचतांत्यक्त्वाकार्यार्थीनिजयोषितम् ॥
नवपित्रातुतस्याश्चनदत्तमृतुदानकम् ३४ तेनपापप्रभावेननरकेपितृभिःसह पति

तोराजशार्दूलत्वत्पितातःसुदारुणः २५ ततःपुनरुवाचेदंराजावैखानसोमुनिम् केनव्रतप्रभावेनमोक्षस्तेषांभवेन्मुने २६ ॥श्रीमुनिरुवाच॥
मार्गशीर्षसितेपक्षेमोक्षानामेतिनामतः सर्वैश्चैतद्व्रतंकार्य्यंपितृभ्यःपुण्यंप्रदीयताम् २७ तेनपुण्यप्रभावेनमोक्षस्तेषांभविष्यति सत्यमेतन्महा
राजब्रह्मणोवचनंयथा २८ मुनेर्वाक्यंततःश्रुत्वास्वगृहंपुनरागतः मार्गशीर्षस्तथामासःप्राप्तःकष्टेनतेनवै २९ पुत्रदारैःसमंकृत्वाव्रतंवैखान
सोनृपः अददत्पुण्यमखिलैःसार्द्धंपित्रेसनृपतिः ४० दत्तेपुण्येतत्क्षणेवैपुष्पवृष्टिरभूद्दिवः वैखानसस्यतातोवैपितृभिर्मोक्षमाविशत् ४१ राजा
नंचांतरिक्षेसगिरंपुण्यामुवाचह स्वस्तिस्वस्तीतितेपुत्रप्रोक्त्वेदंसदिवंगतः ४२ एवंयःकुरुतेराजन्मोक्षामेकादशींशुभाम् तस्यपापानिनश्यंतिमृतेमो
क्षमवाप्नुयात् ४३ नातःपरतराकाचिन्मोक्षदाविमलापरा पुण्यसंख्यांनजानामिराजन्मेप्रियकृद्व्रतम् ४४ चिंतामणिसमाह्येषानृणांमोक्षप्रदा
यिनी पठनाच्छ्रवणाद्स्याः वाजिपेयफलंलभेत् ४५ ॥इतिश्रीमत्स्यपुराणेमार्गशीर्षशुक्लामोक्षानामैकादशीमहात्म्यम् २
श्रीयुधिष्ठिरउवाच॥ पौषस्यकृष्णपक्षेतुकेयमेकादशीभवेत् किंनामकोविधिस्तस्याएतद्विस्तरतोवद १ एतदाख्याहिमेस्वामिन् कोदे
वस्तत्रपूज्यते॥ श्रीकृष्णउवाच॥ कथयिष्यामिराजेंद्रभवतःस्नेहबंधनात् २ तुष्टिर्मेनतथाराजन्यज्ञैर्वहुलदक्षिणैः यथामेतुष्टिरायातिह्ये
कादश्याव्रतेनवै ३ तस्मात्सर्वप्रयत्नेनकर्त्तव्योहरिवासरः ४ सत्यमेतन्नवैमिथ्याधर्मिष्ठानांविशारद पौषस्यकृष्णपक्षेयासफलानामनामतः
५ तस्यांनारायणंदेवंपूजयेच्चयथाविधि पूर्वेणविधिनाराजन्कर्त्तव्यैकादशीशुभा नागानांचयथाशेषःपक्षिणांपन्नगाशनः ६ देवानांचय
थाविष्णुर्द्विपदानांयथाद्विजः व्रतानांतुतथाराजन्श्रेष्ठाचैकादशीतिथिः ७ तेजनाश्चैवभोराजन्पूज्यावैसर्वदामम हरिवासरसंलीनेकुर्वंत्ये
कादशीव्रतम् ८ इहैवधनसंयुक्तामृतामोक्षंलभंतिते सफलायांफलैराजन्पूजयेन्मांमनोरमैः ९ नालिकेरफलैश्चैवक्रमुकैर्वीजपूरकैः जंवीरै
र्दाडिमैश्चैवतथाधात्रीफलैःशुभैः १० लवंगैर्वदरीभिश्चतथाम्रैश्चविशेषतः पूजयेद्देवदेवेशंदीपधूपैस्तथैवच ११ सफलायांविशेषेणदीपदानंतुकार
येत् रात्रौजागरणंचैवकर्त्तव्यंसदवैष्णवैः १२ यावन्निमेषोनेत्रस्यतावज्जागर्त्तियोनिशि एकाग्रमनसोराजंस्तस्यपुण्यंशृणुष्वहि १३ तत्समोनास्ति
यज्ञोवैतीर्थंवातत्समंनहि सर्वव्रतानिराजेंद्रकलांनार्हंतिषोडशीम् १४ एवंवर्षसहस्राणितपसानैवतत्फलम् यत्फलंसमवाप्नोतियःकरो
तिहिजागरम् १५ श्रूयतांराजशार्दूलसफलायाःकथाःशुभाः चंपावतीतिविख्यातापुरीमाहिष्मतस्यच १६ माहिष्मतस्यराजर्षेःपुत्राःपंचकुमा
रकाः तेषांमध्येतुज्येष्ठोवैमहापापरतःसदा १७ परदाराभिचारीचवेश्यासक्तश्चमहानृपः पितुर्द्रव्यंतुतेनैवगमितंपापकर्मणा १८ असद्वृत्तिरतोनित्यं
भूसुराणांतुनिंदकः वैष्णवानांचदेवानांनित्यंनिंदांकरोतिच १९ ईदृशंतुततोदृष्ट्वापुत्रंमाहिष्मतोनृपः नाम्नातंलुंभकंइतिराजपुत्रेषुचावदत् २०
राज्यान्निःकासितस्तेनपित्राचैवतुबंधुभिः तस्यैवपरिवारैस्तुत्यक्तस्यपरिपंथिनः २१ लुंभकोपितदात्यक्तश्चिंतयामासवैतदा त्यक्तोहंबांधवैः

पित्रा राज्यान्निःकासितः किल २२ इति संचिन्तयमानोऽसौ मतिं पापे तदाकरोत् मया गन्तव्यमेवाद्य दारुणे गहने वने २३ तस्माच्चैव पुरं सर्वं व्याधयिष्या
मि वै पितुः इत्येवं स मतिं कृत्वा लुम्भको दैवयोगतः २४ निर्जगाम पुरात्तस्मात् कृतो सौ गहने वने जीवघातरतो नित्यं स्तेयद्यूतकलानिधिः २५
सर्वं च नगरं तेन मुषितं पापकर्मणा स्तेयाभिगामी नगरे गृहीतः स निशाचरैः २६ उवाच तान् मुतो दैवे राज्ञो माहिष्मतस्य च स तैर्मुक्तः पापक
र्मा चागतो विपिने पुनः २७ आमिषाभिरतो नित्यं रतो वै फलभक्षणे आश्रमस्तस्य तत्रास्ति वासुदेवस्य सन्निधौ २८ अश्वत्थो वर्त्तते तत्र जीर्ण
श्च बहुवार्षिकः देवत्वं तस्य वृक्षस्य विपिने वर्त्तते महत् २९ तत्रैव निवसंश्चैव लुम्भकः पापबुद्धिमान् गते बहुतिथे काले कस्यचित्पुण्यसंचयात्
३० पौषस्य कृष्णपक्षे तु दशम्यादिवसे तथा फलानि भुक्त्वा वृक्षाणां रात्रौ शीतेन पीडितः ३१ लुम्भको नाम पापिष्ठो वस्त्रहीनो गतेक्षणः पीड्यमान
स्तु शीतेन वृक्षमूलसमीपगः ३२ न निद्रा न सुखं तस्य गतप्राण इवाभवत् आसाद्य दशनैरस्य मेवं नीतानि शाखिला ३३ भानूदयेऽपि पापिष्ठो न लेभे
चेतनां तदा लुम्भको गतसंज्ञस्तु सफलाया दिने तथा ३४ रवौ मध्यगते चैव संज्ञां लेभे स लुम्भकः इतस्ततो विलोक्याथ उत्थितश्च तदासनात्
३५ वलात् पङ्ग्वाः प्रचलितः खञ्जवत्स मुहुर्मुहुः वनमध्ये गतस्तत्र क्षुत्तृषापीडितोऽपि सन् ३६ न शक्तिर्जीवघातेन लुम्भकस्य दुरात्मनः फलानि च
तदा राजन् नाजहार स लुम्भकः ३७ यावत्स समागतस्तत्र तावदस्तंगतो रविः किं न विष्यति पापेन स विलापं चकार ह ३८ फलानि तत्र न्यस्तानि वृक्ष
मूले न्यवेदयत् इति वाक्यं तदोवाच फलानि हरिप्रीतये ३९ इत्युक्त्वा लुम्भकश्चैव निद्रां लेभे न वै निशि रात्रौ जागरणं मेने विष्णुस्तस्य दुरात्मनः ४०
फलैस्तु पूजनं मेने सफलायास्तदानघ अकस्माद्व्रतमेवैतत्कृतवांश्चैव लुम्भकः ४१ तेन पुण्यप्रभावेन राज्यं प्राप्तमकण्टकम् सूर्यस्योदयनं यावा
वत्तावदश्वो जगाम ह ४२ दिव्यतत्कालमुत्पन्ना वाणी हाशरीरिणी राज्यं प्राप्स्यसि पुत्र त्वं सफलायाः प्रसादतः ४३ तथेत्युक्त्वा वचस्तत्र दिव्यरू
द्धरोऽभवत् मतिरासीत्ततस्तस्य परमा वैष्णवी नृप ४४ दिव्याभरणशोभाढ्यो लेभे राज्यमकण्टकम् कृतं राज्यं तु तेनैव वर्षाणि दशपञ्च च ४५
मनोज्ञास्तस्य पुत्राः सुर्दराः कृष्णप्रसादतः आशु राज्यं परित्यज्य पुत्रे चैव समर्प्य च ४६ गतः कृष्णस्य सान्निध्यं यत्र गत्वा न शोचते एवं यः कुरुते राज
न् सफला व्रतमुत्तमम् ४७ इह लोके यशः प्राप्य मृतो मोक्षमवाप्नुयात् धन्यास्ते मानवा लोके सफलायां च ये रताः ४८ तेषां च जन्म सफलं नात्र का
र्या विचारणा पठनाच्छ्रवणाच्चैव करणाच्च विशाम्पते ४९ राजसूयस्य यज्ञस्य फलमाप्नोति मानवः ५० ॥ इति श्रीगरुडपुराणे पौषीकृष्णा
सफलानामैकादशी ॥ ३ ॥ युधिष्ठिर उवाच ॥ कथितां चैव भो कृष्ण कृपां कृत्वा ममोपरि पौषस्य शुक्लपक्षे या तिथिरेकादशी भवेत् १
किं नाम को विधिस्तस्याः को देवस्तत्र पूज्यते कस्मै तुष्टो हृषीकेश त्वमेव पुरुषोत्तम २ ॥ श्रीभगवानुवाच ॥ शृणु राजन् प्रवक्ष्यामि पौषशुक्ल
स्य या भवेत् कथयामि महाराज लोकानां हितकाम्यया ३ पूर्वेण विधिना राजन् सा कर्त्तव्या प्रयत्नतः पुत्रदा नाम विख्याता सर्वपापक्षयंकरी ४

नारायणोधिदेवोस्याः सर्वकामप्रदायकः नातः परतरा काचित्त्रैलोक्ये सचराचरे ५ विद्यावंतं यशस्वंतं करोति च नरं हरिः शृणु राजन् प्रवक्ष्यामि पुत्रदायाः
कथां शुभां ६ पुरी भद्रावती नाम राजा चैव सुकेतुमान् राज्ञस्तस्य च राज्ञ्यस्य श्चंपं चैवासनत्सुशोभना: ७ पुत्रहीनेन राज्ञा वै कालो नीतः मनोरथैः पुत्रेन
लेभे राजासो ज्ञोनवंशकारकम् ८ तेन राज्ञातिधर्मेण कालो नीतो ति चिंतया किं करोमि क्व गच्छामि सुतहीनो हमेव च ९ न राष्ट्रे न पुरे सौख्यं लेभे रा
जा सुकेतुमान् सो राज्यं जन्मसुकरं नासहत्पुत्रहीनकम् १० राजा राज्ञी ततो जातावत्यो न्यमतिदुःखितौ पितरस्तस्य राज्ञो वै कवोष्णमुपभुंजते ११
राज्ञः पुत्रो न वै जातो यो स्मान्संतर्पयिष्यति इत्येवं चिंतयंतस्ते न लभेयुः सुखं तदा १२ पुत्रहीनैश्च मनुजैर्हारितं भुवनत्रयम् अपुत्रत्वं च पुत्रत्वमेकतु।
त्यं महानृप १३ न ऋणान्मुच्यते मर्त्यो देवपितृनृणां तथा तस्मात्सर्वप्रयत्नेन सुतमुत्पादयेन्नरः १४ इहलोके यशस्तेषां परलोके शुभा गतिः ।
येषां तु पुण्यकर्तॄणां पुत्रजन्म भवेद्ध्रुवम् १५ आयुरारोग्यसंपत्तिस्तेषां लोके च वर्त्तते पुत्रजन्म च येषां वै लोकानां हितकारणम् १६ तपो विना च न प्राप्ति
र्भेमनक्तिं विना नृप सत्यमेतन्न संदेहो राजन्धर्मपरायण १७ पुत्रहीनं तथा राज्यं चंद्रहीना यथा निशा इति संचिंत्य मनसा न शर्म लभते नृपः १८ प्रत्यूषे चिं
तयद्राजा निशीथे दिवसे तथा स्वयमात्मविनाशं च चिंतयामास पार्थिवः १९ एकदा तु गतो राजा प्राणत्यक्तुं सुकेतुमान् दृष्ट्वा पलितमात्मानमपुत्रत्वं तथै
व च २० इति कृत्वा प्रवर्बुद्धिमात्मनो हितकाम्यया अश्वारूढस्ततो राजा जगाम गहनं वनम् २१ न जानंति प्रधाना ये सेवकाश्च तथोत्तरे संप्राप्तो विपि
नं राजा व्यचरच्च इतस्ततः २२ अपश्यच्च वटाश्वत्थविटपांश्च तथा वकुलान् चंपकान् सप्तपर्णांश्च तिंदुकांस्तिलकानपि २३ शालांश्चैव तमालांश्च ।
खदिरांश्च विशेषतः कदलीरिंगुदांश्चैव बदरीश्च तथापरान् २४ शल्लकीकिंशुकांश्चैव कटहाट्टनकांस्तथा शालांश्चैव तमालांश्च शोभिता
न्देहे पुनः २५ व्याघ्रांश्चैव वराहांश्च सिंहांश्चैव विशेषतः गवयांश्च मृगांश्चैव शृंगांश्च शशकानपि २६ वनमार्जारकांश्चैव शल्लकांश्च सरीसृ
पान् वल्मीकार्द्धनिसृतांश्च तथा विषधरानपि २७ दृष्ट्वा तांश्चिंतयामास चात्मनः प्राणनाशनम् महदाश्चर्यसंयुक्तो तद्वनं रौद्ररूपकम् २८
भैरवांश्च शिवास्तद्वदि रुदं च विवासरे इति नादं ततः श्रुत्वा गमनायोपचक्रमे २९ एवं विचरतस्तस्य रविर्मध्यगतो भवत् क्षुत्तृषापीडितो रा
जा इतश्चेतश्च धावति ३० मुखेन शुष्कमालेन चिंतयामास पार्थिवः पातकं किं कृतं देव प्राप्तं दुःखं मयेदृशम् ३१ मया तु तोषिता देव यज्ञस्ना
नाभिषेचनात् पुनर्भूमिसुराश्चैव तोषिता मिष्टभोजनैः ३२ प्रजा वै पालिताः सर्वाः पुत्रवच्च विशेषतः कस्माद्दुःखं मया प्राप्तमीदृशं दारुणं म
हत् ३३ इति चिंतापरो राजा जगामाग्रवने विभुः ससर्वजानां च सरः पुण्यं प्राप महीभुजाम् ३४ मानसस्पर्द्धते यच्च पद्मिनीभिश्च शोभितम् हंसकार
डवाकीर्णं चक्रवाकोपशोभितम् ३५ मकरैर्मत्स्यग्राहैश्च दरिभिस्तुमिस्तथा समीपे तस्य सरसो मुनीनामाश्रमान्बहून् ३६ ददर्श राजा वा
ल्मीकैः शोभितांश्च द्विजन्मनाम् सव्यात्परतरं नेत्रं सव्यात्परतरो भुजः ३७ प्रस्फुरन्नस्य नृपस्य शंसन्तु शुभलक्षणम् तस्य तीरे च मुनयः तपः

कुर्वंति दारुणम् ३८ हर्षोत्फुल्लनयनो मुनीन् दृष्ट्वा बभ्रुवसः अवतीर्य हयात्तस्मान्मुनीनामग्रतो ययौ ३९ इत्थं ववंदे सो राजा मुनीनाम
मसंस्थितान् प्रसृष्टुस्ते च मुनयः प्रसन्नास्तु वयं तव ४० ॥श्रीराजोवाच॥ कुतस्त्या अत्र भवंतो वै येषु वै तप्यते तपः किमर्थमागताश्च
तदवदंतु मम चाग्रतः ४१ ॥श्रीमुनय ऊचुः॥ विश्वेदेवा वयं राजन् स्नानार्थमागताः सरम् अद्य चैकादशी राजन् पौषी शुक्ला तु पुत्र
दा ४२ पुत्रं ददाति वै कुर्वन् यः करोति त्विदं व्रतम् श्रुत्वा मुनीनां हि वचो हर्षाविष्टो ब्रवीन्नृपः ४३ यदि तुष्टा भवंतो वै पुत्रो मे दीयतां तदा राज्ञ
स्तु वचनं श्रुत्वा मुनयो वाक्यमब्रुवन् ४४ ॥श्रीमुनय ऊचुः॥ अद्यास्मिन् दिवसे राजन् पुत्रदा नाम वर्तते एकादशी महाराज क्रियतां व्रत
मुत्तमम् ४५ अस्माकमभिषेकाच्च कृष्णस्यैव प्रसादतः अवश्यं तव राजेंद्र पुत्रश्चैव भविष्यति ४६ पार्थिवो वचनात्तेषां चकार व्रतमुत्तम
म् तत्रैव स्थितवान् राजा मुनिभिः सहितो वने ४७ रात्रौ जागरणं कृत्वा सगीतस्तवैर्हरेः द्वादश्यां पारणं कृत्वा मुनिभिः सह पार्थिवः
४८ आजगाम गृहं राजा हर्षव्याकुलमानसः पुत्रदायाः प्रसादेन राज्ञी गर्भं समादधे ४९ पुत्रो जातस्तु तस्यैव तेजस्वी रूपवान् दृढः तेनैव स
प्रजावेन पालयामास वै प्रजाः ५० एतस्मात्कारणाद्राजन् कर्तव्यासा प्रयत्नतः लोकानां च हितार्थाय पुत्रदैकादशी भवेत् ५१ एकचित्ते
न ये मर्त्याः कुर्वंति धरणीधरः पुत्रान्नवेयुस्ते वा वै मृतास्ते मोक्षमाप्नुयुः ५२ ॥इति श्रीब्रह्मांडपुराणे पौषीशुक्लापुत्रदानामैकाद
शीकथा ४ ॥श्रीयुधिष्ठिर उवाच॥ साधु कृष्ण जगन्नाथ आदिदेव जगत्प्रभो स्वेदजाश्चांडजाश्चैव चोद्भिजाश्च जरायुजाः १ तेषां
कर्ता त्वमेकोसि पालकः संहारकः कथयस्व प्रसादेन कृपां कृत्वा ममोपरि २ माघस्य कृष्णपक्षे तु का वा एकादशी भवेत् किन्नाम को वि
धिस्तस्या एतद्विस्तरतो वद ३ ॥श्रीभगवानुवाच॥ शृणुष्व नृपशार्दूल कृष्णा माघस्य या भवेत् षट्तिला नाम विख्याता सर्वपापप्रणाशि
नी ४ षट्तिलायाः शृणुष्व त्वं कथां पापहरां शुभाम् यां पुलस्त्यो मुनिश्रेष्ठो दाल्भ्यं प्रति चोक्तवान् ५ ॥श्रीदाल्भ्य उवाच॥ मर्त्यलो
कमनुप्राप्य पापं कुर्वंति जंतवः ब्रह्महत्यादिकं पापं तथा जीववधादिकं ६ परद्रव्यापहारं च महदज्ञानमोहिताः अल्पपुण्येन भग
वन् दानेनाल्पेन येन च ७ पापानि प्रशमं यांति येन तद्वक्तुमर्हसि ॥श्रीपुलस्त्य उवाच॥ साधु पृष्टं महाभाग गुह्यमेतदुदाहृतम्
यन्न कस्यचिदाख्यातं ब्रह्मरुद्रादिदैवतैः ८ तदहं संप्रवक्ष्यामि त्वया पृष्टं द्विजोत्तम त्रैलोक्ये पुण्यमनसा पापलेशविवर्जितः ९ देवदेवं च
संस्मृत्य पादौ प्रक्षाल्य वारिणा भूमावापतितं गृह्य गोमयं तत्र संव्रजेत् १० तिलान् प्रक्षाल्य तन्मात्रा पिंडुकांश्चैव कारयेत् अष्टोत्तरशतं चैव ना
त्र कार्या विचारणा ११ ततो माघे च संप्राप्ते ह्याषाढर्क्षं भवेद्यदि मूलं वा कृष्णपक्षस्यैकादश्यां तथा नृप १२ नियमं च प्रगृह्णीयाद्विधानेन तत्र
मे शृणु देवदेवं समभ्यर्च्य सुस्नातः प्रयतः शुचिः १३ कृष्णनामानि संकीर्त्य भक्तियुक्तो भवेन्नरः रात्रौ जागरणं कुर्याज्जात्रौ होमं च कारये

न् १४ अर्चयेद्देवदेवेशं शंखचक्रगदाधरम् चंदनागरुकर्पूरैर्नैवेद्यैः शर्करादिभिः १५ कूष्मांडैर्नालिकेरैश्च ह्यथवा बीजपूरकैः एतेषामप्यलाभे
नशातमूलफलादिभिः १६ अर्घं दद्याद्विधानेन पूजयित्वा जनार्दनम् कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भव १७ संसारार्णवमग्नानां त्राताभ
व जनार्दन जितं त्वया हृषीकेश नमस्ते विश्वभावन १८ सुब्रह्मण्य नमस्तेस्तु महापुरुष पूर्वज गृहाणार्घं मया दत्तं लक्ष्म्या सह जगत्पते १९ इत्य
र्घमंत्रः ततस्तु पूजयेद्विप्रानुदकुंभं तु दापयेत् छत्रोपानद्ववोपेतं कृष्णो मे प्रीयतामिति २० कृष्णा धेनुः प्रदातव्या यथाशक्त्या द्विजन्मने
तिलपात्रं द्विजश्रेष्ठ दद्याच्चैव प्रदक्षिणम् २१ तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी तिलदस्तिलभोक्ता च षट्तिला पापनाशिनी
श्रीदाल्भ्य उवाच ॥ एतद्व्रतस्य भगवन् कीदृशं च फलं भवेत् सोपाख्यानं मम ब्रूहि यदि तुष्टोसि ब्राह्मण २४ ॥ श्रीपुलस्त्य उवा
च ॥ शृणु ब्रह्मन् यथावृत्तमाख्यानं कथयामि ते मर्त्यलोके पुरा ह्यासीद्ब्राह्मणी नाम नारद २५ ब्रह्मचर्यरता नित्यं देवपूजारता सदा मासोप
वासनिरता कृष्णभक्तिकरी सदा २६ कृष्णोपवाससंयुक्ता कृष्णपूजापरायणा शरीरं क्लेशितं चैव सोपवासैर्द्विजोत्तम २७ देवानां ब्राह्मणानां
च कुमारीणां च भक्तितः गृहणेछापयच्छेति सर्वकालं महामते २८ एवं ज्ञात्वा तथा कृष्णो मर्त्यलोकमुपागतः पुनस्तेनैव गदितं देहि भिक्षां
च सुंदरी २९ तया कोपेन महता मृत्पिंडं ताम्रभाजने क्षिप्तं यावत्तया ब्रह्मन् पुनः स्वर्गमहं गतः ३० मृत्पिंडाच्च सुवर्णानां गता सा स्वर्गमंदिरे
संप्राप्ता सा गृहे शुभ्रे धान्यराशिविवर्जिते ३१ गृहं यावन्निरीक्षेत किंचित्तत्र न पश्यति तस्माद्गृहाद्विनिःक्रांता तत्स्थाने सा समागता ३२ क्रो
धेन महता विष्णुं त्विदं वचनमब्रवीत् मया व्रतैश्च कृच्छ्रैश्च चोपवासैरनेकधा ३३ पूजया राधितो देवः सर्वलोकस्य भावनः किंचिद्गृहे न दृष्टं
मे मया देव जनार्दन ततश्च सा मया ज्ञप्ता गृहे गच्छ महाव्रते ३४ आगमिष्यंति सुतरां कौतूहलसमन्विताः देवपत्न्यो हि त्वां द्रष्टुमप्सरोभिः स
मन्विताः ३५ द्वारं नोद्घाटनीयं हि षट्तिलादानकं विना एवमुक्ता मया सा तु गता वै मानुषी तदा ३६ देवपत्न्यः समायाता महावेगसमा
कुलाः ताभिश्च कथितं तत्र त्वां द्रष्टुं हि समागताः ३७ द्वारमुद्घाटय त्वं हि पश्यामस्त्वां सुशोभने ॥ ब्राह्मण्युवाच ॥ यदि द्रष्टुं हि मां देव्यस्तं
वच्मि तवाग्रतः ३८ षट्तिलापुण्यमद्यैव मह्यं देहि विशेषतः एकापि तत्र ब्रह्मर्षे न ददाति महाव्रतम् ३९ एकया कथितं तत्र द्रष्टव्या मानुषी मया दत्तं पुण्यं
तया तस्यै षट्तिलाव्रतसंभवम् ४० ततो द्वारं समुद्घाट्य दृष्टा ताभिश्च मानुषी न देवी न च गंधर्वी नासुरी न च पन्नगी ४१ दृष्टपूर्वा मया नासीद्यादृ
शी सा द्विजर्षभ रूपकांतिसमायुक्ता क्षणेन समपद्यत ४२ धनधान्यसमायुक्ता सुवर्णमणिसंयुता मानुषी रत्नसंपन्ना षट्तिलायाः प्रभावतः ४३
अनेन विधिना राजन् लेभे फलमविच्युतम् अतितृष्णा न कर्तव्या वित्तशाठ्यं विवर्जयेत् आत्मवित्तानुसारेण तिलान्वस्त्राणि दापयेत् ४४ लभ
ते चैव आरोग्यं नरो जन्मनि जन्मनि नाधित्वं न च व्याधित्वं न दारिद्र्यं न दुर्गतिः ४५ न जायते द्विजश्रेष्ठ षट्तिलापापनाशिनी अनेन विधिना राजन् रति

तदानंसमाकुरु ४६ मुच्यतेसर्वपापेभ्योयोददातितिलान्सदा ईदृशंतुव्रतंराजन्येकुर्वंतिनरोत्तमाः ४७ नतेषांपुनरावृत्तिः कल्पकोटिशतैरपि माहा-
त्म्यश्रवणादस्याः सर्वपापक्षयोभवेत् ४८ ॥इतिश्रीभविष्योत्तरपुराणेमाघीकृष्णषट्तिलानामैकादशीकथासंपूर्णा ५
श्रीयुधिष्ठिरउवाच॥ देवदेवजगन्नाथसंसारार्णवतारक कथयस्वकथांपुण्यांसर्वपापहरांपराम् १ माघस्यकृष्णपक्षेयाषट्तिलाकथि-
तात्वयाप्रोक्ता त्वंचैवमेकृष्णकथयस्वप्रसादतः २ किंनामकोविधिस्तस्याएतद्विस्तरतोवद श्रीभगवानुवाच॥ कथयिष्यामिराजेंद्रशुक्ला
माघस्ययाभवेत् ३ जयानामेतिविख्यातासर्वपापहरापरा पवित्राकामदाराजन्मोक्षदाचविशेषतः ४ ब्रह्महत्यापहंत्रीचपिशाचत्ववि-
नाशिनी प्रेतत्वंजायतेनैवविजयैकादशीव्रतात् ५ नातःपरतराकाचित्पापहाचतुर्णांभवेत् अथतांराजशार्दूलकथांपौराणिकींशुभाम्
पंकेरुहपुराणेचमहिमाकथितोमया ६ एकदानाकलोकेतुवज्रीराज्यंचकारह देवास्तत्रसुखेनैववसंतिमनोरथैः ७ पीयूषपाननिरताश्च
अप्सरोभिःसमन्विताः रममाणंवनंतत्रविटपीपारिजातकः ८ रमंतेतत्रदेवाश्चअप्सरोभिःसमंमुदा एकदारममाणाश्चपंचाशत्कोटिना-
यकाः ९ गायतिस्मततस्तत्रगंधर्वःपुष्पदंतकः चित्रसेनस्तुतत्रैवचित्रसेनसुतास्तथा १० मालिनीचैवनाम्नावैचित्रसेनस्ययोषिता मालि-
न्यांचसमुत्पन्नानाम्नापुष्पवतीशुभा ११ पुष्पदंतस्यपुत्रोवैमाल्यवान्नामनामतः पुष्पवतीचतेनैवमोहिताकिन्नरेणवै १२ मदनस्यशरैरेवंविद्धांगी
सावभूवह हावभावकटाक्षैश्चमाल्यवान्सवशीकृतः १३ रूपलावण्यपुक्तासातस्यारूपंशृणुष्वतत् बाहूतस्याश्चकामेनकंठपाशौचकारितौ १
१४ आकर्णदीर्घेतस्याश्चलोचनेघूर्णितेपुनः कर्णौचशोभितौतस्याःकुंडलैरत्नचित्रितैः १५ कंबुग्रीवाधरंतस्याः स्वर्णरूपंचसत्तम विलोलनौ
कुचौतस्याः किंहेमकलशाविव १६ क्षामाचैवकटिस्तस्याः मुष्टिग्राह्यासुशोभना नीरेंभाणौक्रमौतस्याःपीनौतौजघनौतथा १७ पुष्पाव-
तीतदैवंतुमाल्यवंतेनमोहिता मघवंतंनजानीतौकामस्यवशमागतौ १८ गायमानौचतौतत्रह्यप्सरोभिश्चसंमितौ परस्परानुरागेणकाम-
स्यचवशंगतौ १९ एवंज्ञात्वामहेंद्रेणतयोरागस्यवर्द्धनम् नरागःशुद्धमायातिकामस्यवशवर्तिनोः २० कुपितःप्रत्युवाचेंद्रोमाल्यवंतंचरा-
गिणम् धिक्त्वांपापपुराचारयस्यपापेभवन्मतिः २१ अशपच्चमहाकोपान्माल्यवंतंचरागिणम् पिशाचत्वंत्वयाभाव्यंपुष्पावत्यातथैवच २२
एवमुक्तौतुदेवेनपेततुःपृथिवीतले मर्त्यलोकमनुप्राप्तौभवेतांतौचनिंदितौ २३ पिशाचत्वमनुप्राप्तौदुःखितौमानुषेतथा हिमाचलतटं
प्राप्ताविंद्रशापप्रभावतः २४ पिशाचत्वंचसंप्राप्तौदारुणंदुःखमेवच गंधर्वाप्सरसौनावैनजानीतःपरस्परम् २५ निद्रांयौचसुखंनाप्तिनति
प्राजायतोभृशम् प्रत्युवाचपिशाचस्तुपत्नींचैवपिशाचिनीम् २६ किंचायंदुःखकृतंभद्रेदारुणंरोमहर्षणम् येनपापप्रभावेनसंप्राप्तौगतिमी-
दृशीम् २७ तस्मात्सर्वप्रयत्नेनपातकंनैवकारयेत् इतिचिंतापरौतौचौतीव्रशीतेनपीडितौ २८ एकादशीदिनेप्राप्तेकष्टेनमहताभृशम्

मिन्नह्निने न संप्राप्तमप्सरां दैवयोगतः २९ निस्तोयौ तौ पिशाचौ तु पीडितौ विवितिंसंस्थितौ न कृतो जीवघातश्च न प्राप्तं कंदमूलकम् ३० अश्वत्थ
स्य समीपे तु पतितौ चातिदुःखितौ तेनैव तु विषादेन रविरस्ताचलं गतः ३१ प्राप्ता चैव निशा ताभ्यां दारुणा शीतसंयुता परस्परं च संयुक्तौ
लग्नावेकत्र संस्थितौ ३२ न सुखं जायते तत्र शीतेन च प्रपीडितौ मघोनाख्यानमात्रं वा दृष्टौ नो स्वर्गलोकतः ३३ प्राप्ता वै द्वादशी ताभ्यां फलभु
क्तिः कृता ततः अशरीरात्तदा वाणी समुत्पन्नांतरिक्षतः ३४ ध्रुवौ पवित्रौ सततमाश्वेवागच्छतं दिवम् वर्त्तेते तत्र मघवा जनवदर्शनलालसः ३
५ हरिवासरवेलीनात्वेवैविष्णुपरायणाः अस्माकं तेन राज्ञैव स्वजनीयाः प्रयत्नतः ३६ इति वाक्यं ततः श्रुत्वा मुक्त्वा देहं पिशाचकम् तत्क्षण
तौ दिवं प्राप्तौ ब्रह्मन्तस्मात्स्वप्रभावतः ३७ एतस्मात्कारणाद्राजन्कर्त्तव्यैकादशीतिथिः माघशुक्ला जयानाम ब्रह्महत्यापहारिणी ३८ सर्व
दानानि दत्तानि तीर्थान्येव कृतानि वै जयायेन कृता राजन् पिशाचत्वविमोचिनी ३९ कल्पकोटिशतं यावद्वैकुंठे मोदते नरः पठ
नाच्छ्रवणाद्राजन् दशगोदानजं फलम् ४० ॥ इति श्रीभविष्योत्तरपुराणे माघीशुक्लाजयानामैकादशीकथासं
पूर्णा ॥६॥ श्रीसूत उवाच ॥ पप्रच्छ देवदेवेशं ब्रह्माणं जगतां पतिम् नारदः सर्वतत्वज्ञः सर्वज्ञश्च सर्वगः १॥ श्रीनारद उवाच ॥ फा
ल्गुणस्यासिते पक्षे कावा एकादशी भवेत् किन्नामको विधिस्तस्याः को देवस्तत्र पूज्यते २॥ श्रीब्रह्मोवाच॥ कथयिष्यामि नो पुत्र व्रतं शतोत्तम व्रत
म् फाल्गुणस्यासिते पक्षे विजयैकादशी भवेत् ३ जयं ददाति सर्वेषां नृणां चैव विशेषतः सत्यमेतन्मया प्रोक्तं नान्यथा मम भाषितम् ४ रामेण पि
वने प्राप्ते वर्षाणां च चतुर्दशम् हृतो दशमुखो येन सीता प्राप्ता व्रतादतः ५॥ श्रीनारद उवाच॥ कथं व्रतमिदं पुण्यं रामेण विभुना कृतम् तद्ब्रूहि
मे महाभाग कथां रामस्य पावनीम्॥ श्रीब्रह्मोवाच॥ शृणु वत्स प्रवक्ष्यामि रामेण विभुना कृतम् रामस्तत्रैव वसति सीतया लक्ष्मणेन च ६ पंचव
ट्यां वसन्रामो वने राज्यमिवाकरोत् इत्येवं वसतस्तस्य रामस्य विदितात्मनः ७ रावणेन हृता भार्या सीता नाम तपस्विनी तेन दुःखेन रामोपि मोह
मभ्यागतो मुने ८ जटायोर्मरणं जातं कबंधवधमेव च सुग्रीवस्य सहायत्वं संजातं सपरिग्रहम् ९ वानराणां शतान्येव सीतार्थं संगतानि वै हनू
मांश्चैव लंकायां मद्दृष्ट्वा त्वपांपतिम् १० गतो दुःखेन महता सीता हृष्टातिदुःखिता पुनरागत्य रामाग्रे सीतासंगमवर्णनम् ११ इति श्रुत्वा ततो रा
मो वाक्यं चैव हनूमतः सुग्रीवानुमते चैव वरुणालयसन्निधौ ११ आगतो वानरैः सार्द्धं लंकाविध्वंसनाय च दृष्ट्वा रामः समुद्रं तं विस्मयं प्राप्तवा
न् प्रभुः १२ प्रभुवाच ततो वाक्यं लक्ष्मणं शुभलक्षणम् केन व्रतप्रभावेन तीर्य्यते वरुणालयः १३ ॥ लक्ष्मण उवाच॥ आदिदेव त्वमेकोसि
पुराणपुरुषोत्तमः दाल्भ्यमुनिशार्दूल वर्त्तते द्वीपमध्यगः १४ इतस्त्र्योजनार्द्धं च वर्त्तते तस्य चाश्रमः तेनैव मुनिना राम वयं दृष्टाः सुचेतसः १५ त
स्माद्राम मुनिश्रेष्ठं गच्छामो ह्येवमाचिरम् इति वाक्यं ततः श्रुत्वा लक्ष्मणस्य रघूत्तमः १६ जगाम रामस्तत्रैव दाल्भ्यो यत्र संस्थितः प्रणामं करोतैवेमु
निं विष्णुमिव स्थितम् १७ मुनी रामं ततो ज्ञात्वा वजावे सर्वदर्शिनः कार्यार्थमवनिं प्राप्तं प्रविष्टं मानुषीं तनुम् १८ ॥ श्रीमुनिरुवाच॥ कस्माद्राम

त्वमत्रैव मम पार्श्वे समागतः त्वां जाने पुरुषं पूर्णं स्वागतं तव विद्यते १९ ॥श्रीराम उवाच॥ त्वत्प्रसादाद्वै विप्र वरुणालयसन्निधौ आगतो वानरैः सार्द्धं रावणस्य वधाय च
२० भवतामनुकूलेन तीर्यते वरुणालयः तदेव कथ्यतां येन तीर्यते विप्र सागरः २१ लक्ष्मणेनेदमुक्तं मे रामस्य पुरुषोत्तमः त्रिकालज्ञो मुनिश्रेष्ठो व्रतं ते कथयिष्यति।
२२ येन व्रतप्रभावेन विजयी त्वं भविष्यसि एतस्मात्कारणाद्देव शंभुं त्वां समुपागतः २३ ॥श्रीमुनिरुवाच॥ अगाधो वारिधी राम तीर्यते च व्रतोत्तमात् तद्व्रतं कुरु ध
र्मिष्ठ येन ते विजयो भवेत् २४ फाल्गुनस्यासिते पक्षे व्रतानामुत्तमं व्रतम् एकादशी च विजया विजयश्च भवेद्ध्रुवम् २५ समुद्रं हेलया चैव तरिष्यसि सवानरः।
विधिश्चास्य तां राजन्येनेदं क्रियते व्रतम् २६ दशम्यादिवसे प्राप्ते कुंभमेकं तु कारयेत् हैमं वा राजतं वापि ताम्रं वापि च मृन्मयम् २७ पंचपल्लवसंयुक्तं पूर्णं।
शीतेन वारिणा तस्योपरि न्यसेद्देवं लक्ष्मीनारायणं सदा २८ एवं विधाय तत्रैव प्रातः स्नानं विधाय च निश्चलं स्थापयेत्कुंभं कंठमाल्यानुलेपनैः २९ उत्तमैर्नालिकेरैश्च
पूजयेच्च विशेषतः सप्तधान्यमवस्थाप्य पात्रमुपरि न्यसेत् ३० धूपदीपैस्तथा गन्धैर्नैवेद्यैर्विविधैस्तथा कुंभाग्रे तद्दिनं राम नीयते स्थिरचेतसा ३१ रात्रौ जागरणं चैव
कारयेत्कुंभसन्निधौ द्वादश्यादिवसे प्राप्ते तथा भानूदये सति ३२ नीत्वा कुंभं जलोद्देशे नद्याः प्रश्रवणे तथा तडागे वाथ वा वाप्यां नीयते च घटोत्तमः ३३ दीयते सद्य
ो देव ब्राह्मणाय यथाविधि महादानानि दीयंते समं कुंभेन वाग्रज ३४ अनेनैव विधानेन रघुवंशसमुद्भव कर्तव्यैकादशी राजन्विजया तु जयप्रदा ३५ इति श्रुत्वा
ततो रामो यथोक्तमपि तद्वचः चकार राघवो वत्स व्रतानामुत्तमं व्रतम् ३६ तीर्णश्चार्णो व्रतेनैव सत्वरः पयसां निधिः जानकी चैव संप्राप्ता निहतो रक्षसां पतिः ३७
अनेन विधिना राजन्ये कुर्वंति नरोत्तमाः इह लोके च विजयः परलोके शुभा गतिः ३८ एतस्मात्कारणात्पुत्र कर्तव्यैकादशी तिथिः पठनाच्छ्रवणाद्वास्या गंगास्नानफलं
लभेत् ३९ ॥इति श्रीस्कंदपुराणे ब्रह्मनारदसंवादे फाल्गुणी कृष्णा विजया नामैकादशी कथा संपूर्णा ७ श्रीमांधातोवाच॥ आमर्दकी
फलं वृद्धिमहापातकनाशनम् सरहस्यं मुनिश्रेष्ठ गोसहस्रफलप्रदम् १ ॥श्रीवसिष्ठ उवाच॥ अत्र वोदाहरंतीममितिहासं पुरातनम् यथा मुक्तिमनुप्राप्तो
व्याधो हिंसासमन्वितः २ वैदेशं नाम नगरं हृष्टपुष्टजनाकुलम् ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च समलंकृतम् ३ रुचिरं नृपशार्दूल ब्रह्मघोषनिनादितम् न नास्तिको
न दुष्टो वा तस्मिन्पुरवरे सदा तत्र सोमान्वयो राजा विख्यातश्च यथा शशिः नाम्ना चैत्ररथो राजा धर्मात्मा सर्वसंगरः ५ नागायुतबली श्रीमान्सर्वशास्त्रार्थपारगः
तस्मिन्शासति धर्मज्ञे धर्मात्मा नो नराभुवि ६ कृपणो नैव कुत्रापि दृश्यते नैव निर्द्धनः सुभिक्षं क्षेममारोग्यं तस्मिन्राज्यं प्रशासति ७ विष्णुभक्तः सदा राजा तस्मि
न्पुरवरे सदा हरिपूजारताः सर्वे राजा चापि विशेषतः ८ न भुक्त्वा नैव कृत्वा च द्वादशीमुमुचुर्जनाः सर्वधर्मान्परित्यज्य हरिभक्तिपरायणाः ९ एवं संवत्सरा रा
जन्बहवो विगताः प्रभो जनस्य सौख्ययुक्तस्य हरिधर्मरतस्य वै १० अथ कालेन संप्राप्ता द्वादशी पुष्यसंयुता फाल्गुनस्य सिते पक्षे नाम्ना सामर्दकी स्मृता ११ ता
मवाप्य जनाः सर्वे सबालस्थविरा नृप नियमं चोपवासस्य सर्वे चक्रुः परंतप १२ महाफलं व्रतं ज्ञात्वा स्नानं चक्रुर्वहिर्जले यत्रो देवालये राजा लोकाश्चापि महोत्त
माः १३ पूर्णकुंभमवस्थाप्य छत्रोपानहसंयुतम् पंचरत्नसमायुक्तं दिव्यगंधाधिवासितम् १४ दीपमालासमायुक्तमग्निहोत्रसमन्वितम् तत्र जागरणं चक्रुर्जनाः
सर्वे स्वभक्तितः १५ एतस्मिन्नेव काले तु व्याधस्तत्स्थानमागतः क्षुधाश्रमपरिव्याप्तो भयार्त्तो निःश्वसन्निवः १६ संप्राप्तो मलसंयुक्तो महाभारेण पीडितः कुटुंबार्थं जी

वधात्तीसर्वधर्मवहिष्कृतः १७ जागरंतत्रसोपश्यदामर्दक्याः क्षुधान्वितः दीपमालाकुलंदृष्ट्वातत्रैवनिषसादसः १८ किमेतदितिसंचिंत्यशान्तोविस्मयतांगताम् ददर्शकुंभंतत्रैवदेवंदा
मोदरंतथा १९ ददर्शामलकीवृक्षंतदग्रस्थांश्चदीपकान् वैष्णवंचतथाख्यानंशुश्रावपठतांनृणाम् २० एकादश्याश्चमाहात्म्यंशुश्रावक्षुधितोपिसन् जाग्रतस्तस्य
सारात्रिःगताविस्मयचेतसः २१ ततःप्रभातसमयेविविशुर्नगरंजनाः व्याधोपिगृहमागत्यबुभुजेप्रीतमानसः २२ ततःकालेनमहताव्याधःपंचत्वमागतः एकाद
श्याःप्रभावेनरात्र्यांजागरणस्यच २३ राज्यंप्रपेदेसुमहच्चतुरंगबलान्वितम् जयंतीनामनगरेतत्रराजाविदूरथः २४ तस्यसुतनयोजज्ञेनाम्नावसुरथोवली च
तुरंगवलोपेतोधनधान्यसमन्वितः २५ दशायुतानिग्रामाणांबुभुजेभयवर्जितः अयुतंदशसाहस्रंकथितंसर्वसूरिभिः २६ तेजसादित्यसंकाशःकां
त्याचंद्रसमप्रभः पराक्रमेविष्णुसमःक्षमयापृथिवीसमः २७ धार्मिकःसत्यवादीचविष्णुभक्तिपरायणः ब्रह्मण्यश्चसुधर्माचसत्यधर्मपरायणः
२८ यजतेविधिनायज्ञान्सराजापरदर्पहा दानानिविविधान्येवददात्येवहिसर्वदा २९ एकदामृगयांयातोदैवान्मार्गात्परिच्युतः नदिशंनै
वविदिशंवेत्तितत्रमहीपतिः ३० अपश्यत्सपरिश्रांतोन्यग्रोधंशाखिनांवरम् तस्यच्छायांसमाश्रित्यसुष्वापसमहीपतिः ३१ उपधायतदोर्मूलमे
काकीसघनेवने अत्रांतरेम्लेच्छगणःपर्वतांतरवासिनाम् ३२ आययौतत्रयत्रास्तेराजापरबलार्दनः कृतवैरास्तुतेनासन्सर्वेदैवो
पपादिताः ३३ परिवार्यततस्तेवैराजानंभूरिदक्षिणम् हन्यतांहन्यतांचैवसर्ववैरविरोधिनः ३४ अनेननिहताःसर्वेपितरोभ्रातरःसुताः पौत्राश्चभागिनेयाश्चमातु
लाश्चनिपातिताः ३५ निर्वासिताश्चस्वस्थानाद्विक्षिप्ताश्चदिशोदश एतावदुक्त्वातेसर्वेततस्तंहंतुमुद्यताः ३६ पाशैश्चपट्टिशैःखड्गैर्बाणैर्धनुषिसंधितैः सर्वेतेरिपवस्तं
वैराजानंहंतुमुद्यताः ३७ सर्वाणिशस्त्राणिसमुद्भवंतिनैवंशरीरेप्रविशंतितस्य तेवापिसर्वेहतसत्वसंघाम्लेच्छाबभूवुर्गतदेहजीवाः ३८ पदापिचालितुंतत्रनशेकुस्तेर
योम्लेच्छाःशस्त्राणिकुंठितानिजग्मुःसर्वेषांहततेजसाम् ३९ दीनाबभूवुस्तेसर्वेयेतंहंतुंसमागताः एतस्मिन्नेवकालेतुतस्यराज्ञःशरीरतः ४० निःसृताप्रमदाह्येकासर्वाभर
णभूषिता दिव्यगंधसमायुक्तादिव्यवस्त्रविभूषिता ४१ दिव्यमालासमुच्छन्नाभ्रूकुटीकुटिलानना साविस्फुलिंगानेत्राभ्यांवमंतीपावकंमुहुः ४२ तद्दोहृतकराचैवका
लरात्रिरिवागता अभ्यधावच्चसंक्रुद्धाम्लेच्छान्लसंतडःसहा ४३ निहताश्चतदादैत्याःस्तेयकर्मरताःसदा ततोराजाविबुद्धःसन्ददर्शमहदद्भुतम् ४३ हतान्म्लेच्छ
गणान्दृष्ट्वाराजाचिंतामवापसः इमेकेनहताम्लेच्छाह्यत्यंतममवैरिणः ४५ केनेदंचकृतंकर्ममहदस्मद्धितार्थिना एतस्मिन्नेवकालेतुवागुवाचाशरीरिणी ४६
तंस्थितंनृपतिंदृष्ट्वानिःकामंविस्मयान्वितम् शरणंकेशवादन्योनास्तिकोपिविधायकः ४७ वनात्तस्माच्चकुशलीसमायातश्चभूमिभुक् राज्यंचकारधर्मा
त्मासम्यग्यांदीव्यतेवसन् ४८ ॥श्रीवशिष्ठउवाच॥ आमर्दकीव्रतंराजन्येकुर्वंतिनरोत्तमाः तेषांचवैष्णवंलोकंनात्रकार्याविचारणा ४९
कथनाच्छ्रवणाद्राजन्सर्वपापैःप्रमुच्यते वाचकंपूजयेद्भक्त्यावस्त्रालंकारभूषणैः ५० ॥इतिश्रीब्रह्मांडपुराणेफाल्गुनशुक्लाआमर्द
कीनामैकादशीकथासंपूर्णा ॥८॥ युधिष्ठिरउवाच॥ फाल्गुनस्यासितेपक्षेश्रुतासामर्दकीमया चैत्रस्यकृष्णपक्षेतुकिन्नामैकादशीभवेत्
१॥ श्रीकृष्णउवाच॥ शृणुराजेंद्रवक्ष्यामिमाहात्म्यंपापनाशनं यत्प्रोमशोब्रवीत्पृष्टोमांधात्राचक्रवर्तिना २॥ मांधातोवाच॥ लोकानांचैवस

वैष्यांहितार्थाय महामुने इच्छामहे भगवंतं लोमशं मुनिसत्तमं १ चैत्रस्य प्रथमे पक्षे का वै एकादशी भवेत् किन्नाम को विधिस्तस्याः कथयस्व प्रसादतः २
॥लोमश उवाच॥ चैत्रस्य प्रथमे पक्षे नाम्ना वै पापमोचनी शृणु राजन्कथां तस्याः पवित्रां पापनाशिनीं ३ पुरा चैत्ररथो नाम वनं कोकिलनादितं
मधुस्वनादसंयुक्तं किन्नरीभिर्विराजितं ४ देवकन्यास्तु तत्रैव निवसंति मनोरमाः ब्रह्मविष्णुमहेशाद्या माधवे रमंति च ५ नापरं पुण्यदं किंचिद्वनं
चैत्ररथादपि तस्मिन्वने च मुनयस्तपंति विविधं तपः ६ शच्या समं तु मघवा रमते माधवे तथा तत्रैव तपसां श्रेष्ठो मेधावी नाम नामतः ७ मेधावी
नाम मुनिवरं मोहनायोपचक्रमे मंजुघोषेति नाम्ना वै तस्य भावं विचिन्वती ८ मेधाविनो भयाच्चैव क्रोशमात्रं तु सा जगौ गायमाना च तां चैव पुष्पदंतेन वेष्टितं ९ कामोपि वि-
जयार्थाय शिवभक्तं मुनीश्वरं तस्य चांगेषु व्यसृजच्छिववैराश्रयात्तदा १० भ्रुवौ च धनुषी कृत्वा गुणं नेत्रमथोऽकरोत् नयनांतं तु बाणांस्तं विजयार्थं गताशरः
११ मेधाविनं मुनिं दृष्ट्वा सा च कामेन पीडिता कामोन्नतेन देहेन मेधावी तत्र वर्तते १२ यज्ञोपवीतदेहेन राजते च हिमालयः विद्यावान्सर्वशास्त्रज्ञो वेदवेदांगपारगः
१३ मेधावी चाश्रमे तत्र वर्तते मुनिपुंगवः मंजुघोषापि तत्रैव दृष्ट्वा च मुनिपुंगवं १४ कामबाणवशं प्राप्ता मंदं गायति सुस्वरा वीणानादेन स मुनिस्ताडितो स्मर-
यातया १५ गायंतीं तां च सो दृष्ट्वा मेधावी मुनिपुंगवः कामबाणमनुप्राप्तो वक्तुं नैव शशाक सः १६ कामबाणैः पुराको मो मोहितः शिवनिर्जितः मंजुघोषा समागत्य मुनिं
मेधाविनं तथा १७ हावभावैस्तु वामोरूर्मोहयामास तं मुनिं अधः संस्थाप्य सा वीणां परिरेभे मनोदशौ १८ वल्लीवल्ललिता देहे मुनेर्देहसंगता रेमे मुनिवरोऽत्यर्थं त-
थासार्धं मुहुर्मुहुः १९ रहस्ये च तया सार्धं यत्र स्थाने मनोरमे शिवतत्त्वं गतं तस्य कामतत्त्वविरागतः २० निशां चैवाप्यहश्चैव तत्राश्रमे रमयंस्तदा एवं गतो महा-
न्कालस्तस्य मेधाविनो मुनेः २१ काललोपाच्च बहवो मुनेस्तस्यानवेन्नृप सा गंतुं देवसदने मंजुघोषोपचक्रमे २२ वरांगना प्रत्युवाच रमंतं मुनिसत्तमं आदेशं देहि मे स्वा-
मिन्स्वर्गस्य गमनाय वै २३ महान्कालो गतस्त्वायं त्वत्समीपे मम प्रभो ॥मुनिरुवाच॥ अद्यैव त्वं समायाता प्रदोषादेवरांगने २४ प्रातः संध्या समायाति ता-
वत्त्वं च स्थिरा भव इति श्रुत्वा मुनेर्वाक्यं भयभीता तदाभवेत् २५ पुनः सा रमयामास मुनिं मेधाविनं तदा मुनेः शापभयाद्भीता बहुकालं च सा रमत् २६ पंचाश-
त्पंच वर्षाणि नव मासान्दिनत्रयं व्यरमन्मंजुघोषा च मुनेर्मनसि तामसी २७ ॥मंजुघोषोवाच॥ प्रसादं कुरु मे ब्रह्मन्ममादेशः प्रदीयतां त्वत्प्रसा-
दाच्च विप्रर्षे स्वर्गं यामि शीघ्रतः २८ ॥मुनिरुवाच॥ प्रातःकाले समायाता श्रूयतां वचनं मम प्रातःसंध्यां करोयावत्तावत्त्वं च स्थिरा भव २९ इति वाक्यं ततः श्रु-
त्वा मंजुघोषा भयानकं स्मितं कृत्वा च सा तत्र प्रत्युवाच शुचिस्मिता ३० ॥मंजुघोषोवाच॥ किं प्रमाणं च विप्रर्षे तव संध्या भविष्यति मयि प्रमादं कृत्वा तु पश्चात्स-
र्वं विचार्यतां ३१ चुकोप तस्य स मुनिर्ज्वालामालावृतोऽभवत् नेत्राभ्यां तस्य विप्रस्य पेतुरग्निकणाः क्षणात् ३३ इति वाक्यं ततः श्रुत्वा विस्मयोत्फुल्ललोचनः सप्तपं-
चनवा विप्रस्य माक्षोपं गता मुने ३२ एवं विचारयामास मेधावी मुनिपुंगवः अनयाग्निभासया यत्तपो मम मतुकाष्टवत् ३४ भस्मसात्कृतमद्यैव का गतिर्मे भविष्यति
स्फुरदोष्ठस्तु रोषेण प्रत्युवाचाकुलेंद्रियः ३५ मंजुघोषोऽस्त्वातो भयस्त्वं च पिशाचिनी धिक्त्वां पापे दुराचारे मत्कृतसनकृतं त्वया ३६ तस्य शापेन संदिग्धा विनयाव-
नता स्थिता प्रसादं कुरु ते ब्रह्मन् शापानुग्रहकं वद ३७ सतां संगेन जो विप्र नैतत्कृतं मुनीश्वरः त्वया सह समा ब्रह्मन्नीताश्च बहवो मया ३८ ॥मुनिरुवाच॥ शृणु वाक्यं

तुष्टो भवेद्यथा पापान्मत्थयदर्कं तथा किं करोमि त्वया पापे क्षयं नीतं तपो मम ३९ चैत्रे मासेऽसिते पक्षे पिशाचत्वविनाशिनी पापमोचनिका नाम सर्वहत्याप्रणाशि-
नी ४० यदा सा च समायाति पिशाचत्वं हि यास्यति इत्युक्त्वा स मुनिस्तस्यै जगाम गहनं वनं ४१ स्वतातस्याश्रमे प्राप्तः पापेनाविष्टचेतनः आयांतं तं सुतं
दृष्ट्वा च्यवनो वाक्यमब्रवीत् ४२ किमेतत्तात कं तात तत्त्वया सीत्सुपुण्यसंचयं ॥ मेधावी उवाच ॥ बहु पापं कृतं तात तस्य स्मरारमिता मया उपायं यत्कथ
मार्गेण कृतं तत्तत्क्षयं गतं त्वया तत्कथ्यतां ब्रह्मन्पापं यस्मात्क्षयं भवेत् ४४ ॥ च्यवन उवाच ॥ चैत्रे मासेऽसिते पक्षे नाम्ना वै पापमोचिनी कर्तव्या,
सा प्रयत्नेन पापं यास्यति तावकं ४५ इति श्रुत्वा पितुर्वाक्यं कृतवान्व्रतमुत्तमं कृते पापं मुनेस्तस्य तत्क्षणात्क्षयं गतं ४६ शापेन मंजुघोषा या दिव
सा बहुरोगता: गतं पापं तु तस्या हि पापमोचनकाव्रतात् ४७ दिव्यरूपधरा सा च गता नाके वराप्सराः ॥ लोमश उवाच ॥ एवमन्ये पि राजेंद्र ये कुर्वंति न
रोत्तमाः ४८ तेषां यत्पातकं किंचित्तत्क्षणाच्च क्षयं व्रजेत् कामदा इह लोके च परलोके च मोक्षदा ४९ पठनाच्छ्रवणाद्राजन्गोसहस्रफलं भवेत् ब्र
ह्महा चैव गोघ्नश्च सुरापो गुरुतल्पगः ५० व्रतादस्माद्राजेंद्र पवित्रं संभविष्यति ५० ॥ इति श्रीभविष्योत्तरपुराणे चैत्रीकृष्णा पापमोचिनी
नामैकादशी कथा संपूर्णा ॥ श्रीकृष्ण उवाच ॥ चैत्रमासस्य शुक्लायामेकादश्यां तु वै तथा आंदोलनीयो देवेशः सलक्ष्मीको महोत्स
वः १ चैत्रस्य शुक्लैकादश्यां दोलायात्रा हरेः स्मृता दोलास्थितं ये पश्यंति ते कृतार्था न संशयः २ आंदोलनदिने प्राप्ते रुद्रेण सह देवताः कुर्वंति प्रेंगणेन
तं मत्वा सेवनसंशयः ३ दोलास्पर्शो त्कायजं हंति पापं तु स्यादौघं वाचिकं दृष्ट्वा रूपं विलोलसंतत्त्वं वो वीक्षजा तद्दोषत्र्यापा बधं विलक्ष्य दोला ४ य
थाम्रगा पलायंते दृष्ट्वा केशरिणं वने तथा पापानि नश्यंति दोलारूढं च पश्यति ५ ॥ युधिष्ठिर उवाच ॥ वासुदेव नमस्तुभ्यं कथयस्व ममाग्रतः चै
त्रस्य शुक्लपक्षे तु किंनामैकादशी भवेत् १ ॥ श्रीकृष्ण उवाच ॥ शृणुष्वैकमना राजन्कथामेतां पुरातनीं वशिष्ठो यामकथयत्पाद्दिलीपाय पृच्छते
॥ श्रीदिलीप उवाच ॥ वशिष्ठ मुनिशार्दूल इच्छामि त्वां सुविस्तरात् चैत्रस्य विशदे पक्षे का पिचैकादशी भवेत् १ किंनाम को विधिस्तस्याः एतद्वि
स्तरतो वद किं फलं समवाप्नोति व्रतादस्माच्च मानवः २ ॥ वशिष्ठ उवाच ॥ शृणु राजन्कथयिष्यामि फलं यच्च भवेद्ध्रुवं पापेंधनमहाघोरं शु
कार्यं च विधामतं ३ तत्सर्वं दहते पापं पावको हरिवासरः चैत्रस्य विशदे पक्षे तिथिरेकादशी तु या ४ श्रेया कामवती नाम्ना सर्वपापहरा परा शृ
णु राजन्कथामेतां विचित्रां श्रुतिसौख्यदां ५ एकदा हि पुरे रम्ये हेममाल्ला विभूषिताः पुंडरीकमुखा नागा निवसंति मदोत्कटाः नागस्तु पुंडरीको वै राजा राज्यं
चकार ह गंधर्वैरप्सरोभिश्च सेव्यमानो दिवानिशं ७ वराप्सरा पि ललिता गंधर्वा गोपि च शोभिता ललितो पि च सस्त्रेहो पुवा कामी मदोत्कटः ८ उभौ रागेण
संयुक्तौ तु नौ कामेन पीडितौ रेमाते तौ तु स्वगृहे बहुधान्यसमाकुले ९ ललिताचित्तसंलीन आसीत्सः ललितस्तदा ललितस्य सदा स्वांते ललिता,
वसते ध्रुवं १० पुंडरीकास्ये नागा वर्तंते सदसि स्फुटं ललितस्तु वरस्त्रैर्वकुर्वंता गानमुत्तमं ११ गानं कुर्वन्स ललितः सस्मार ललितां तदा कामग
ए वरां प्राप्तः पुंडरीकस्य चाग्रतः १२ गानं कुर्वन्स ललितो ललिताप्रेमयंत्रणे गंधर्वकुलरत्नो यः सर्वविद्याविशारदः १३ तस्य मा चंचतत्रैव कर्कोटो पि च

जानयत् कर्कोट उवाच ॥ शृणु त्वं पुंडरीकाहो मम वार्त्तां च सांप्रतं १४ ललितस्य स्वयाभावो ज्ञातो वा यन वा प्रभो इति श्रुत्वा ततो वाक्यं पुंडरीको महोरगः १५ ललि
तं दृष्ट्यामास ललितावेष्टचेतसं रौद्रो भूत्वा ततो नागो दुर्निरीक्ष्यो भयंकरः १६ शशाप ललितं तत्र एवं कृत्वा सुनिष्ठुरं उष्ठ पापकुरचार मदग्रे कामपीडितः १७ ललिता
यावत्राक्षसः किं न जानाम्यहं तदा वचनात्तस्य नागस्य राक्षसः सोऽभवत्क्षणात् १८ रौद्राननो विरूपाक्षो दीर्घकायो भयंकरः योजनायुतकायश्च कंदराभिमुख
स्तथा १९ चंद्रसूर्यनिभाक्षश्च पर्वतोपममस्तकः नासारंध्रे च तस्यैव नीतेविविरसंनिभे २० अधरोष्ठे भयंकरौ राक्षसः पापकर्मकृत् आयतं तच्छरीरं च योजना
न्यति भीषणं २१ ईदृशो दानवो भूत्वा ततः क्षणाद्दिविनेगतः चिंतयित्वा च ललिता पतिं च विकृताननं २२ ध्यायमाना पतिं चैव महद्दुःखेन दुःखिता किं क
रोमि क्व गच्छामि पतिः पापेन मोहितः २३ इति संस्मृत्य ललिता सौख्यं न लभते तस्य सा स्वयं पश्चात्पतिं नारी विचचार वने वने २४ निर्घृणः पापसंव्याप्तो विरूपः
कुरूपादकः न सुखं लभते रात्रौ न दिवा पापपीडितः २५ ललिता चिंतयामास पतिं दृष्ट्वा च दारुणं भ्राम्यमाना वने नारी रुरोद करुणस्वरैः २६ कदा
चित्तु निशार्द्धेलो विंध्यपर्वतमस्तके आश्रमे पर्वताग्रे तु वसमानो मुनीश्वरः २७ शीघ्रं तत्रैव गत्वा सा विनयावनता स्थिता प्रत्युवाच मुनिः शृंगी कात्वं क
स्य सुता शुभे २८ किमर्थमिह संप्राप्ता कथयस्व वरानने ॥ ललितोवाच ॥ वीरधन्वा तु गंधर्वः सुताहं तस्य भो मुने २९ ललिता नाम मे स्वामिन्प्र
त्यर्थमिह चागता पुंडरीकस्य नागस्य दग्धः शापेन तत्क्षणात् ३० राक्षसः पापसंवीतस्तं दृष्ट्वा न सुखं मम तद्व्रतं तत्र पश्चैव कथयस्व प्रसादतः ३१
येन व्रतप्रभावेन राक्षसत्वं विनश्यति ॥ मुनिरुवाच ॥ चैत्रमासस्य चाद्यैव सितपक्षस्तु विद्यते ३२ नाम्ना वै पापललिता वर्त्तते हरिवासरः त्वयैतद्व्र
तमेवाशु क्रियतां च शुभानने ३३ कृते व्रते च संपूर्णे फलं तस्मै प्रदीयतां दत्ते पुण्ये क्षणात्तस्य प्रेतत्वं च विनश्यति ३४ इति श्रुत्वा ततो वाक्यं विनयाव
नता स्थिता अकरोद्विधिना तेन ललिता सा वरांगना ३५ विप्रस्यैव तु सान्निध्ये मुनेरग्रतस्तथा इति वाक्यं जगादासौ पतेः संतारणाय च ३६ मया च यत्कृतं पु
ण्यं यत्तेद्दत्तं महोत्तमं तेन पुण्यप्रभावेन प्रेतभावात्तु तत्क्षणात् ३७ ललितायास्तु वचनात् गतं पापं सुदारुणं गतपापस्तु ललितो दिव्यदेहो भवत्क्षणात्
३८ दानवत्वं गतं तस्य गंधर्वत्वमभूत्ततः हेमरत्नसमाकीर्णे रेमे ललितया सह ३९ विमाने च समारूढो सर्वरूपाधिरूपिणौ गतो स्वर्गे व्रतादस्मात्सर्वसौख्यस
मन्वितो ४० इति ज्ञात्वा तु राजेंद्र कर्त्तव्यासा प्रयत्नतः लोकानां च हितार्थाय कथिता च मया तव ४१ इह लोके यशः कीर्तिं परलोके मोक्षदायिनी ब्रह्महत्या
पहारी च महापापप्रणाशिनी ४२ नातः परतरा काचित्त्रैलोक्ये सचराचरे पठनाच्छ्रवणाद्राजन्वाजपेयफलं लभेत् ४३ एतस्मात्कारणाद्राजन्दिलीपनृपस
त्तमः श्रोतव्यं चैव कर्त्तव्यं मम वाक्यप्रयत्नतः ४४ ॥ इति श्रीब्रह्मांडपुराणे चैत्रशुक्ला कामवती नामैकादशी समाप्ता ॥ ॥ॐ॥
श्रीयुधिष्ठिर उवाच ॥ वैशाखस्यासिते पक्षे किं नामैकादशी भवेत् कथयस्व महिमानं मे वासुदेव नमोस्तु ते १ ॥ श्रीकृष्ण उवाच ॥ सौभाग्यदा
यिनी राजन्निह लोके परत्र च वैशाखकृष्णपक्षे तु नाम्ना चैव वरूथिनी २ वरूथिन्या व्रतेनैव सौख्यं भवति सर्वदा पापहानिश्च भवति सौभाग्यप्राप्तिमेव च
३ दुर्भगाया करोत्येनां सा स्त्री सौभाग्यमाप्नुयात् लोकानां चैव सर्वेषां भुक्तिमुक्तिप्रदायिनी ४ सर्वपापहरा नृणां गर्भवासनिकृंतिनी वरूथिन्या व्रतेनैव मांधा

नाकस्थितिं गतः ५ धुंधुमारादयश्चान्ये राजानो बहवस्तथा ब्रह्मकपालनिर्मुक्तो बभूव भगवान्भव ६ दशवर्षसहस्राणि तपस्तपति यो नरः तत्तुल्यं फल
माप्नोति वरूथिन्याव्रतान्नरः ७ श्रद्धावान्यस्तु कुरुते वरूथिन्याव्रतं नरः वांछितं लभते सोपि चेह लोके परत्र च ८ पवित्रा पावनी ह्येषा महापातकनाशिनी
भुक्तिमुक्तिप्रदा ताच कर्तव्या नृपसत्तम ९ अश्वदानान्नृपश्रेष्ठ गजदानं विशिष्यते गजदानाद्भूमिदानं तिलदानं ततोधिकं १० ततः सुवर्णदानं च अ
न्नदानं ततोधिकं अन्नदानात्परं दानं न भूतो न भविष्यति ११ पितृदेवमनुष्याणां तृप्तिरन्नेन जायते तत्समं कविभिः प्रोक्तं कन्यादानं नृपोत्तम १२ धेनुदा
नेन च तत्तुल्यमित्याह भगवान्स्वयं प्रोक्तेभ्यः सर्वदानेभ्यो विद्यादानं विशिष्यते १३ तत्फलं समवाप्नोति नरः कृत्वा वरूथिनीं कन्यावित्तेन जीवंति ये न
राः पापमोहिताः १४ पुण्यक्षयस्ते गच्छंति निरयं यातनायुतं तस्मात्सर्वप्रयत्नेन न ग्राह्यं कन्यकाधनं १५ कन्यां पुण्येन यो दद्यात् यथाशक्ति स्वलंकृतां
तत्पुण्यसंख्यां नृपते चित्रगुप्तो न वेत्त्यलं १६ तत्तुल्यं फलमाप्नोति नरः कृत्वा वरूथिनीं ॥ अथैकादशीनियमः कांस्यं मांसं मसूरांश्च चणकान्कोद्रवां
स्तथा शाकं मधु परान्नं च पुनः भोजनमैथुने १७ वैष्णवो व्रतकर्ता च दशम्यां दश वर्जयेत् द्यूतं क्रीडां च निद्रां च तांबूलं दंतधावनं १८ परापवादं पैशुन्यं स्तेयं हिं
सां तथा रतिं क्रोधं ह्यनृतवाक्यं च ह्येकादश्यां विवर्जयेत् १९ कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभाषणं व्यायामं च प्रवासं च पुनर्भोजनमैथुने २० स्पृष्टास्पृ
ष्टमसूरान्नं द्वादश्यां परिवर्जयेत् अनेन विधिना राजन्विहिता यैर्वरूथिनी २१ रात्रौ जागरणं कृत्वा समर्चयेन्मधुसूदनं सर्वपापविनिर्मुक्तास्ते यांति परमां
गतिं २२ तस्मात्सर्वप्रयत्नेन कर्तव्या पापभीरुभिः क्षपारितनयाभीतैर्नरदेव वरूथिनी २३ पठनाच्छ्रवणाद्राजन् गोसहस्रफलं भवेत् सर्वपापविनिर्मु
क्तः स्वर्गलोके महीयते २४ ॥ इति श्रीभविष्योत्तरपुराणे वैशाखकृष्णा वरूथिनीमाहात्म्यं संपूर्णम् ॥ श्रीयुधिष्ठिर उवाच ॥
वैशाखे शुक्लपक्षे तु किंनामैकादशी भवेत् किंफलं को विधिस्तत्र कथयस्व जनार्दन १ ॥ श्रीकृष्ण उवाच ॥ पुरा रामो हि पप्रच्छ वसिष्ठं मुनिसत्त
मं तदहं संप्रवक्ष्यामि नराणां हितकाम्यया २ ॥ श्रीराम उवाच ॥ भगवन् श्रोतुमिच्छामि व्रतानामुत्तमं व्रतं सर्वपापक्षयकरं सर्वदुःखनिकृंतनं
३ मया दुःखानि भुक्तानि जानकीविरहजानि तु ततो विरहभीतोस्मि पृच्छामि त्वां महामुने ४ ॥ वसिष्ठ उवाच ॥ साधु पृष्टं त्वया राम तवैषा नैष्ठिकी मतिः
त्वन्नामग्रहणेनैव पूतो भवति मानवः ५ तथापि कथयिष्यामि लोकानां हितकाम्यया पवित्रं च पावनं च व्रतानामुत्तमं व्रतं ६ वैशाखस्य सिते पक्षे एकाद
शी राम या भवेत् मोहनी नाम सा प्रोक्ता सर्वपापहरा परा ७ मोहजालात्प्रमुच्येत पातकानां समूहतः अस्या व्रतप्रभावेन सत्यं सत्यं वदाम्यहं ८ अतः
कारणतो राम कर्तव्यैषा भवादृशैः पातकानां क्षयकरी महादुःखविनाशिनी ९ शृणुष्वैकमना राम कथां पापहरां परां यस्याः श्रवणमात्रेण महापाप
क्षयो भवेत् १० सरस्वत्यास्तटे रम्ये पुरी भद्रावती शुभा द्युतिमान्नाम नृपतिस्तत्र राज्यं करोति वै ११ सोमवंशोद्भवो राम धृतिमान्सत्यसंगरः तत्र वैश्यो
निवसति धनधान्यसमृद्धिमान् १२ धनपाल इति ख्यातः पुण्यकर्मप्रवर्तकः प्रपासत्रागायतनतडागारामकारकः १३ विष्णुभक्तिरतः शांतस्तस्यासन्पंच पु
त्रकाः सुमना द्युतिमांश्चैव मेधावी सुकृती तथा १४ पंचमो धृष्टबुद्धिश्च महापापरतः सदा परस्त्रीसंगनिरतो विटगोष्ठिविशारदः १५ द्यूतादिव्यसनासक्तः पर

स्त्रीरतिर्लालसः नदेवानर्चयति कुधीन रतीनप्यतिथीन् द्विजानपि १६ अन्यायवर्ती दुष्टात्मा पितृद्रव्यक्षयंकरः अजस्रं जारकः पापः सुरापानरतः सदा १७
वेश्याकंठक्षिप्तबाहुश्चत्वरे धृष्टश्चतुःपथे पित्रा निष्काशितो गेहात्परित्यक्तश्च बांधवैः १८ स्वदेहभूषणान्येव क्षयं नीतानि तेन वै गणिकाभिः परि-
त्यक्तो निंदितश्च धनक्षयात् १९ ततश्चिंतापरो जातो वस्त्रहीनः क्षुधार्दितः किं करोमि क्व गच्छामि केनोपायेन जीव्यते २० तस्करत्वं समारब्धं तेन वै
वनगरे ततः गृहीतो राजपुरुषैर्मुक्तश्च पितृगौरवात् २१ पुनर्बद्धः पुनर्मुक्तः पुनर्बद्धः स संभ्रमैः धृष्टबुद्धिः दुराचारो निबद्धो निगडैर्दृढैः २२ ताडित-
श्च कशाघातैः पीडितश्च पुनः पुनः एवमुक्तस्ततो राज्ञा मोचितो दृढबंधनात् २३ न स्थातव्यं मदाज्ञप्त्वया मद्देशगोचरे निर्जगाम भयत्रस्तस्ततोसौ
गहनं वनं २४ क्षुत्तृषापीडितश्चायमितश्चेतश्च धावतः सिंहवन्निजघानासौ मृगशूकरचित्तलान् २५ आमिषाहारनिरतो वने तिष्ठति सर्वदा करे शरा-
सनं कृत्वा निषंगं पृष्ठिसंगतं २६ अरण्यचारिणो हंति पक्षिणश्च चतुःपदान् वनस्थचमरीं हंति तथा वानरवायसान् २७ चकोरं चाषमयूरं श्ववनति-
त्तिरक्षपकान् मार्जारांश्च वराहांश्च कोकिलान्नकुलांस्तथा २८ एतांश्चैव तथान्यांश्च धृष्टबुद्धिश्चाभक्षयत् पूर्वजन्मकृतैः पापैः निमग्नः पाप-
कर्दमे २९ दुःखशोकाभिसंतप्तश्चिंतयन्नेव पापकृत् कौडिन्यश्च मुनिश्रेष्ठो तपः कुर्वन्नुदाहृतः ३० जाह्नव्यास्तटे रम्ये स्नानार्थं समुपाययौ वैशाखे
पापोपहरे तत्र स्नानं चकार ह ३१ कृत्वा स्नानं जगामाशु आश्रमं स्वाश्रमं प्रति मार्गे स धृष्टबुद्धिश्च महदुःखेन वेष्टितः ३२ कौडिन्यो जललेशेन स्पृष्टवान्वै
स्वपंकजं तथा विंदूनां स्पर्शनादेषः पुण्यवान्सोभवत्क्षणात् ३३ कौडिन्यं मुनिशार्दूलं विनयावनतो वदत् ॥ धृष्टबुद्धिरुवाच ॥ मे ब्रूतं देहि भो स्वामिन्
विना वित्तेन यद्भवेत् ३४ आजन्मकृतपापस्य शांतिर्वित्तं मम नास्ति न प्रायश्चित्तं वद ब्रह्मन् विना वित्तेन यद्भवेत् ३५ कौडिन्य उवाच ॥ शृणुतो चैव भो
वत्स यस्मात्पापक्षयो भवेत् वैशाखस्य सिते पक्षे मोहिनी नाम नामतः ३६ एकादशी महापुण्या पवित्रा पापनाशिनी मेरुतुल्यानि पापानि क्षयं नयति
तत्क्षणात् ३७ पातकानि क्षयं यांति पंचास बहुजन्मनो इति वाक्यं ततः श्रुत्वा विधिनिष्ठो यथाविधि ३८ धृष्टबुद्धिर्व्रतं शीघ्रमकरोत्प्रीतचेतसा ।
सर्वपापक्षयं नीतं व्रतादस्माच्च तेन वै ३९ तत्क्षणान्मोक्षवान्सोभूत् गरुडासनः दिव्यदेहयुतो भूत्वा गरुडोपरि संस्थितः ४० जगाम वैष्णवं लोकं
सर्वोपद्रववर्जितं ईदृशं कथितं राम मोहिनीव्रतमुत्तमं ४१ नातः परतरं किंचित्त्रैलोक्ये वर्तते नृप महादानानि यज्ञाश्च कलां नार्हंति षोडशीं ४२
यज्ञादितीर्थदानानि कलां नार्हंति षोडशीं पठनाच्छ्रवणाद्राजन् गोसहस्रफलं लभेत् ४३ इति श्रीकूर्मपुराणे वैशाखशुक्ला मोहिनी-
नामैकादशीकथासंपूर्णं १२ श्रीयुधिष्ठिर उवाच ॥ ज्येष्ठस्य कृष्णपक्षे च का वा एकादशी भवेत् को देवः को विधिस्तस्याः किं फलं
च भवेत्कृष्ण १ एतदाचक्ष्व मे कृष्ण यथा वै पापस्य मोचिनी श्रोतुमिच्छामि माहात्म्यं वदतस्ते जनार्दन २ ॥ श्रीकृष्ण उवाच ॥ साधु पृष्टं त्वया राज-
न् लोकानां हितकाम्यया महापापानि यान्येव तेषां चैव विनाशिनी ३ अपरा नाम राजेंद्र अपरफलदायिनी लोके प्रसिद्धिमायाति अपरां यस्तु सेवते ४
ब्रह्महा च महापापी गोत्रहा भ्रूणहा तथा परापवादवक्ता च परस्त्रीरसिकस्तथा ५ अपरासेवनाद्राजन् पापो मर्त्यः प्रजायते कूटमानी कूटसेवी कूटसा-

जीवहंतियः तुलाकूटकरः पापी कूटभाषाप्रवादकः ६ कूटवेदं पठेद्विप्रः सोप्ययं नरकं व्रजेत् अपरासेवनाद्राजन् सर्वपापक्षयो भवेत् ७ क्षत्रियः क्षात्रध
र्मं च संत्यक्त्वा युद्धात् पलायते स गच्छेन्नरकं घोरं यावदिंद्राश्चतुर्दश ८ शिष्यः शास्त्रं पठित्वा तु गुरुं निंदति सर्वदा अनेकैस्तु व्रतैः राजन्मुच्यते पातकाद्ध्रुवं ९
तस्मात्सर्वप्रयत्नेन निंदा त्याज्या गुरोरपि यदि निंदति पापिष्ठस्तस्य पापं शृणुष्व तत् १० चतुरशीति कल्पानि तावंत्येव युगानि च चतुरशीति वर्षाणि रौर
वे पच्यते ध्रुवं ११ अतः परं शृणुष्व त्वं महिमानं नृपोत्तम पुष्करे वा प्रयागे वा काश्यां चैव नृपोत्तम १२ त्रिपुरेपि गुराजेंद्र नवचोखरकेषु च विशालायां
च केदारे यत्पुण्यं माघे तिथ्येव च १३ एषु तीर्थेष्वनेकेषु सेव्यमानेषु यत्फलं तत्फलं समवाप्नोति ह्यपरासेवनान्नृप १४ कुरुक्षेत्रे रवौ ग्रस्ते यावान्हेमस
मुक्तवान् शतं वापि सहस्रं वा भारसंख्यामिता न्वयुतान् १५ गयायां पिंडदानेन प्रयागे तीर्थस्नानिनि यत्फलं मुनिभिः प्रोक्तमपरासेवनाद्भवेत् १६
नातः परतरा काचित्तु एकादशी फलप्रदा संदेहात्र मतं नैव मम वाक्यं न राजिप १७ अर्धप्रसूतां गां राजन्यो ददाति नरोत्तमः तेनैव पृथिवी दत्ता स
द्वीपवनसागरा १८ तस्माच्छतगुणं पुण्यमपराव्रतसेवनात् लोकानां चैव सर्वेषां हिताय कथिता मया १९ पठनाच्छ्रवणाद्राजन् गोदानजं फलं
स नरः समवाप्नोति यः करोति व्रतं शुभं २० ॥ इति श्रीब्रह्मांडपुराणे कृष्णज्येष्ठी अपरानामैकादशीकथा संपूर्णा ॥ १२ ॥ भीम
सेन उवाच ॥ भगवन्देवदेवेश वासुदेव वदस्व मे एकादश्यां न भोक्तव्यं सर्वकाले हरेर्दिने १ एकभुक्तं न शक्नोमि चोपवासो हि दूरतः वृकनामा च
यो वह्निः स सदा जठरे मम २ अतिवेलं तु भुक्तं वा भोजनं क्रियते मया उपवासं न शक्नोमि कर्तुं देवकीनंदन ३ तदहं किं करोमीह जपहोमादिकं हरे
कर्णं' एतज्ज्ञात्वा कृपां कृत्वा ममाग्रे कथय प्रभो ४ ॥ श्रीभगवानुवाच ॥ सत्यं सत्यं त्वया भीम ममाग्रे कथितं वचः उपवासः समस्तानां भोजनं चाप्यकारणं ५
अस्माद् एकोपवासेन कृते वापीह यत्फलं कथयामि न संदेहस्तन्मे शृणु हि कुंतिज ६ ज्येष्ठे मासे च संप्राप्ते वृषस्थे तु दिवाकरे अथवा मिथुने भीम
शुक्ला एकादशी भवेत् ७ उपवासं तु यस्तस्याः करोति जलवर्जितं तेनासौ समवाप्नोति चतुर्विंशैकादशीजं फलं ८ नियमस्तु प्रकर्तव्यो दंतधावनपूर्व
कः एकादश्यां निराहारो भविष्यामि वै जलं ९ सत्यसौ सुततः सम्यक् शरणं मे भवाच्युतः द्वादश्यां देवदेवेश स जानीयात्त्रिविक्रमः १० गदां च दक्षिणे हस्ते
खड्गश्चापि च दक्षिणे शंखं तु वामहस्ते तु वामे चक्रं ततो मुखं ११ एकस्त्रिविक्रमो देवो ध्यायतां मम तत्परं ददाति नैव संदेहः कर्तव्या भवता सदा १२ एकादशी
दिने भीम वर्जयंति च ये फलं फलकोटिसुवर्णस्य फलं तेषां प्रजायते १३ एकभुक्तेन नक्तेन तथैवायाचितेन च उपवासेन दानेन न त्याज्यैकादशी तिथिः १४
द्विजो चैव प्रकर्तव्या गंधपुष्पादिभिस्तथा देवदेव हृषीकेश संसारार्णवतारक १५ उदकुंभप्रदानात् प्रीयतां त्रिविक्रमः उदकुंभः प्रदातव्यो ब्राह्म
णाय सुचेतसा १६ नानावस्त्रसमायुक्तं छत्रोपानहसंयुतं उदकुंभं तथा धेनुं जलधेनुं तथैव च १७ द्वादश्यां भोजयित्वा तु विप्रानन्नेन नैवेद्य स्वयं पश्चात्कु
र्वीत भीम निर्जलैकादशीव्रतं १८ आप्नोति मानवो लोके सहस्रैकादशीफलं पठनाच्छ्रवणाद्राजन् गोसहस्रफलं लभेत् १९ ॥ इति श्रीगरुडपुराणे
ज्येष्ठी शुक्ला निर्जला नामैकादशीकथा संपूर्णा ॥ १४ ॥ श्रीकृष्ण उवाच ॥ चातुर्मास्ये हरौ सुप्ते नियमान्यो न पालयेत् समस्यो

नियमा
निरयं याति तस्य जन्म निरर्थकं १ यस्मान्नित्यं कुरुते ब्राह्मणः सुधीः अक्षय्यं समवाप्नोति स विष्णोः परमं पदं २ तस्मात्सर्वप्रयत्नेन रजनीयोजनार्दनः उपवा
सेन राजेन्द्र यदिच्छेन्मोक्षमात्मनः ३ मत्स्यमांसं तथैवेणं ग्राम्यकं सूकरं तथा नाश्नाति यः पुमान्मांसं स याति परमां गतिं ४ ॥ युधिष्ठिर उवाच ॥ १
आषाढस्यासितेपक्षे का वा एकादशी भवेत् किन्नाम को विधिस्तस्या एतद्विस्तरतो वद ५ ॥ श्रीकृष्ण उवाच ॥ व्रतानामुत्तमं व्रतं लोकानां च हिता
यदैव कथयिष्यामि नो राजन्भुक्तिमुक्तिप्रदायिकं ६ आषाढस्यासितेपक्षे योगिनी नाम नामतः तस्या व्रतप्रभावेन रज्यो भवति मानवः ७ तस्मा
त्सर्वप्रयत्नेन कर्त्तव्यैकादशीतिथिः कामदा त्विह लोके हि परलोके च मोक्षदा ८ महापातकहंत्री च महापुण्यफलप्रदा योगिनी नाम या राजन्नस
र्वजन्तोतमा स्मृता ९ संसारे दुस्तरे राजन्सारमेकादशीव्रतं जगत्त्रयमसारं वै सारं तु योगिनीव्रतं १० एकदा राजराजो वै शिवभक्तिपरायणः तस्यैव पुष्प
वटुको हेममालीति नामतः ११ योषितांगेषु संसक्तः कामबाणवशं गतः मनसा पुष्पमालीयमध्याह्नसमये ततः १२ वटुको हेममाली च रतिको भूत्
यासह नागतः पुष्पवटुकः कोपात्सम्प्रत्युवाच ह १३ कथं न चागतो यक्षो हेममालीति नामभाक् कृतः पापकर्मासौ विलुवाच पुनः पुनः १४
यक्षा ऊचुः सहपत्न्या च संलीनः कामबाणवशंगतः हेममाली तया सार्द्धं रमते क्रीडते नृप १५ काललोपो न वेद्दुः किमिदं च विशिष्यते आर
क्तो तो वटुकः कामी सर्वथाकुललोचनः १६ यक्षाधिपुरतो गच्छेत् पुष्पमाली समन्वितः तावत्स धनदः क्रुद्धः कोपात्करुणलोचनः १७ स्फुर
दोष्टपुटः क्रुद्धः शशापैनं पुनः पुनः अष्टादशैव कुष्ठानि तव देहे भवंतिति १८ तया सह वियोगं त्वं पापदुःखविवर्द्धनं अस्मात्स्थानाच्च तेद्यपतनं भ
वतु स्फुटं १९ इति श्रुत्वा ततो वाक्यं तस्माल्लोकात्पपात सः महदुःखसंयुक्तश्चैव पापे कुष्ठेस्य पीडितः २० नैवान्नं न च पानीयं वने भ्रमति दारुणे
शिवराजप्रभावेनास्य वजाति स्मरस्तथा २१ महापापी तु जानाति सर्वजातिं निजां तदा भ्रमन् जगाम दुःखेन हिमाद्रिपर्वतोत्तमं २२ तत्रैव को
मुनिशार्दूलो मार्कंडेयो महातपाः तस्यायुर्वर्त्तते राजन्ब्रह्मणश्च दिनत्रयं २३ समागत्यगतस्तस्य ह्याश्रमे स्वर्गसन्निभे जगृहे चरणौ मूर्द्ध्ना ततः पाप
रूपभाक् २४ मार्कंडेयो मुनिश्रेष्ठो दृष्ट्वा तं कुष्ठिनं तदा परोपकरणार्थाय वचनं चेदमब्रवीत् २५ कस्मात्कुष्ठानि ते त्वं कस्मात्त्वं निंदितस्तदा
एवमुक्तस्तदा तेन स वटुर्मुनिमब्रवीत् २६ ॥ हेममाली उवाच ॥ राजराजस्य भोब्रह्मन्वटुको हेममालिकः यानि यानि च पुष्पाणि मानसा
द्विपुलानि च २७ देवसूजनवेलायामानयामि महामुने एकस्मिन्दिवसे स्वामिन्महापापप्रसंगतः २८ काललोपः कृतस्तात पत्नीभोगे
नैव मया तदा तेनैव मस्तोऽहं महादुष्टानि भावतः २९ एतदुःखं हि मे स्वामिन्न जानेतेदारुणं प्रभो यत्सतो दर्शनं चैव परोपकरणाय च ३० एत
द्वाक्यं मुनिः श्रुत्वा करुणायुक्तमानसः मार्कंडेयो महाप्राज्ञो वचनं चेदमब्रवीत् ३१ ॥ श्रीमार्कंडेय उवाच ॥ साधु त्वं यक्ष वटुक त्वया
तथ्यं निवेदितम् कथयामि व्रतं पुण्यं येन कुष्ठक्षयो भवेत् ३२ आषाढे चैव संप्राप्ते योगिनी व्रतमुत्तमम् तद्गोप्यम मायैतु गतकुष्ठो भविष्य
सि ३३ इति वाक्यं मुनेः श्रुत्वा दंडवत्पतितो भुवि सर्वजन्मानि मोब्रह्मन् मया च सुकृतं कृतम् ३४ तदिदं समनुप्राप्तानव संगतिरुत्तमा

॥ श्रीकृष्ण उवाच ॥ यथाविधि समाप्ते तु मुनेः स्ववचनात्तदा तेनैव वटुकेनैव योगिन्याश्च कृतं व्रतम् २५ कृते व्रते महाराज देवरूपो भवत्क्षणात् हेममालीति वटु
को जगाम स्वगृहं तदा २६ अष्टाशीतिसहस्रेषु भोजितेषु द्विजेषु वै यत्फलं लभते राजंस्तत्फलं योगिनीव्रतात् २७ महापापापहंत्री च महापुण्यफलप्रदा पठना
च्छ्रवणाच्चास्याः गोसहस्रफलं लभेत् २८ ॥ इति श्रीब्रह्मवैवर्तपुराणे कृष्णाषाढीयोगिनीनामैकादशीकथा संपूर्णा ॥ २५ श्रीयुधिष्ठि
र उवाच ॥ आषाढस्य सिते पक्षे का वा चैकादशी भवेत् किंनामको विधिस्तस्याः एतद्विस्तरतो वद १ ॥ श्रीकृष्ण उवाच ॥ कथयामि महापुण्यां स्वर्ग
मोक्षप्रदायिनीम् कामिका नाम नाम्ना सा सर्वपापहरा परा २ यस्याः श्रवणमात्रेण वाजिपेयफलं लभेत् सत्यं सत्यं मया प्रोक्तं नान्यत्पुण्यतरं नृणाम् ३ पापि
नां पापनाशाय सृष्टा धात्रा महोत्तमा नातः परा च राजेंद्र वर्त्तते मोक्षदा नृणां ४ एतस्मात्कारणाद्राजन्नुपोष्यतां व्रतमुत्तमम् भवेन्मोक्षो नराणां च पठनाच्छ्रवणा
दपि ५ ते सदा वैष्णवा लोके मम भक्तिपरायणाः आषाढे वामनो येश्च पूजितः श्रद्धया समः ६ वामनः पूजितो येन कमलैः कमलेक्षणः आषाढस्य सिते प
क्षे कामिकौ दिने तथा ७ तेनार्चितं जगत्सर्वं त्रयो देवाः सनातनाः एतस्मात्कारणाद्राजन्कर्त्तव्यो हरिवासरः ८ ॥ श्रीयुधिष्ठिर उवाच ॥ संज्ञायोऽस्ति महा
त्मेयं श्रूयतां पुरुषोत्तम कथं नु स्वपिति देवेशः कथं च बलिमाश्रितः ९ कथं च मोच सर्वेशः किं कुर्वंति जनास्तथा किं व्रतं केन विधिना चातुर्मास्यमुपासते १०
तत्र सुप्ते दिने देव किं कुर्वंति जनाः परे एतद्वद महाप्राज्ञ संशयोऽस्ति महान्मम ११ ॥ श्रीकृष्ण उवाच ॥ श्रूयतां राजशार्दूल कथां पापहरां पराम् यस्याः श्र
वणमात्रेण सर्वपापक्षयो भवेत् १२ बलिर्दैत्यो नवः सर्वमासीत्त्रेतायुगे नृप सञ्जयति समं नित्यं मद्भक्तो मत्परायणः १३ यज्ञैश्च विविधैस्त्रैलोक्यैर्यजते मां सनि
यमाः द्विजानां पूजको नित्यं यज्ञकर्म कृतं तथा १४ अपरं वासवो देवो देवलोके सुरैः सह महत्त्वमिंद्रलोकं तु जितवान्मनुजाधिपः १५ एवं विचार्य बहुधा मन
सा संकल्पितस्तथा गुरुणा च सुरैः सार्धं बहुधा पूजितोऽप्यहम् १६ ततो वामनरूपेण अवतारं च मे तथा अत्युग्ररूपेण तदा सर्वब्रह्मांडरूपिणा १७ बा[illegible]
लेन जितो वाचा सत्यत्वात्सत्यसंस्थितः शुक्रस्तं वारयामास नन्नारायण इत्यसौ १८ याचिता वसुधा राजन्सार्धत्रयपदं मया संकल्पस्योदकं तेन मत्करे च
समर्पितम् १९ रूपमीदृग्विधं राजंस्तदा पूर्णं मया कृतम् भूर्लोके चरणो न्यस्तो भुवर्लोके च जानुनी २० स्वर्गलोके कटिर्न्यस्ता महर्लोके तथोदरम् जनलो
के च हृदयं तपोलोके च कंधरम् २१ सत्यलोके मुखं स्थाप्य मस्तकं च तथोर्ध्वकम् सूर्यादयो ग्रहाश्चैव नक्षत्राणि तथैव च २२ देवाः सेंद्राश्च नागाश्च यक्षा गंधर्वकिन्नराः
स्तुवंति देवसंघाश्च वेदैश्च विविधैः सह २३ करे गृहीत्वैव बलिं त्रिपदाद्भूरितं जगत् अर्धं च तस्य पृष्ठे हि पदं न्यस्तं मया तदा २४ ततो रसातलं राजन्प्रापितो मम सेवकः
हि स्वीच दानवं तत्र तत एतदकारिषम् २५ विनयावनतस्तस्मात्सुप्रसन्नो जनार्दनः आषाढस्य सिते पक्षे कामिका हरिवासरः २६ तस्यामेका च मूर्तिर्मे ब
लिमाश्रित्य तिष्ठति द्वितीया शेषपृष्ठे च क्षीरसागरमध्यतः २७ स्वपत्येव महाराज यावदागामिकार्त्तिकी तावद्भवति धर्मात्मन्सर्वधर्मोत्तमोत्तमम् २८ व्रते च कुरु
ते मर्त्यः स याति परमां गतिम् एतस्मात्कारणाद्राजन्कर्त्तव्या सा प्रयत्नतः २९ नातः परतरा काचित्पवित्रा पापनाशिनी यस्यां स्वपिति देवेशः शंखचक्रगदाधरः ३० त
स्यां च पूजयेद्देवं शंखचक्रगदाधरम् रात्रौ जागरणं भक्त्या कामिकाया व्रते भवेत् ३१ तस्य पुण्यस्य संख्यां न कर्त्तुं शक्नश्चतुर्मुखः एवं यः कुरुते राजन्नेकादश्या व्रतोत्तमम्

२२ सर्वपापहरं चैव भुक्तिमुक्तिप्रदायकम् सदा ह्यमोमममप्रः स्वपचोपि किमं समजः २३ चातुर्मास्ये दुष्टे सुतै श्वलिशायी भवेन्नरः अथवा ब्रह्मचर्यस्थः स याति परमां गतिं
२४ दीपदानेन पालाशपत्रे भुक्त्वा व्रतेन वै चातुर्मास्यं नयंतीह ते नराः मम वल्लभाः २५ एकादशीव्रतेनैव धर्मवान् सर्वपापैर्विमुच्यते कर्तव्या सा सदा राजन् विस्म
र्त्तव्या न कर्हिचित् २६ शृणुयाच्चैव यो राजन् कथां पापहरां पराम् अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः २७ ॥ इति श्रीस्कंदपुराणे आषाढीशुक्ला
कामिकानामैकादशीकथासंपूर्णा २८ श्रीनारद उवाच ॥ कथ्यतां चैव मे ब्रह्मन् पिता त्वं च पितामह सर्वसृष्टिश्च कर्त्ता च देवकीनंद
न १ श्रावणस्यासिते पक्षे का वा एकादशी भवेत् किन्नामको विधिस्तस्या वद सत्यं चतुर्मुख २ ॥ श्री ब्रह्मोवाच ॥ श्रावणस्यासिते पक्षे कमलाना
म नामतः तस्याः श्रवणमात्रेण वाजपेयफलं लभेत् ३ अस्यां यः पूजयेद्देवं शंखचक्रगदाधरम् बलेशमोदकं देवं माधवं मधुसूदनम् ४ यजते ध्यायते चैव त
स्य पुण्यं शृणुष्व मे काश्यां चैव गयायां च नैमिषे पुष्करे तथा ५ यत्फलं लभते मर्त्यस्तत्फलं कृष्णपूजने गोदावर्यां गुरौ सिंहे व्यतीपाते च दंडके ६ ससागरवनो
पेतां धरां दद्याच्च यो नरः अस्य पूजनेन तत्पुण्यं समतां न भवेत् ७ श्रावणे श्रीधरं देवं पूजयेद्यो नरोत्तमः तेनैव पूजिता देवा गंधर्वोरगपन्नगाः ८ संसारार्णव
मग्ना ये मग्ना दुःखसागरे तेषामुद्धरणार्थाय कमला हरिवल्लभा ९ योगयुक्तो नरो यः स्यादध्यात्मनिरतः सदा यत्फलं समवाप्नोति तत्फलं कमलाव्रतात्
१० रात्रौ जागरणं कृत्वा भक्त्या चैव विशेषतः भास्करिं नैव पश्यंति न ते गच्छंति दुर्गतिम् ११ कमलाया व्रतेनैव केवलं ये योगिनो गताः तस्मात्सर्वप्रयत्नेन कर्त्त
व्यैकादशी तिथिः १२ तुलस्या एकपत्रेण यो नरः पूजयेद्धरिम् न स लिप्येत पापैश्च पद्मपत्रमिवांभसा १३ भारेस्सुवर्णजातके रजतस्य शतद्वये दत्तेय
त्फलमाप्नोति मर्त्यस्तत्तुलसीदले १४ मौक्तिकं चैव रत्नं च वैडूर्यं हारकं तथा एकतस्तुलसीपत्रं विष्णोः प्रीतिकरं परम् १५ तुलसीमंजरीभिर्यो मानवः पूजये
द्धरिम् तस्य पुण्यस्य संख्यानं चित्रगुप्तो न लेखयेत् १६ एकादशीदिने मर्त्यो यो हरेर्दीपं ददाति यः मया तत्पुण्यसंख्यानं नास्ति सर्वत्र शृणु नारद १७ दीपं ददाति यो मर्त्यो ह
रेर्वासरे निर्जलितः तस्य पुण्यस्य संख्यानं न लिखेद्धि दशाननः १८ कृष्णाग्रे दीपकं यस्तु पितृनुद्दिश्य योजयेत् स पितृं स्वर्गलोके दत्तदक्षिणैः सर्वानद्यापरान् १९ एत
त्पुण्यं महादेव सदीपकस्य नरस्य च किं पुनः स्यामिलोके वक्तुं पुण्यात्पुण्यतरं स्मृतम् २० एतस्माच्चैव कर्तव्या कमला पापनाशिनी ब्रह्महत्यामहानित्यं भ्रूणहत्याप
हारिणी २१ उपवासं लभते पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् राज्यार्थी लभते राज्यं किं ब्रूमश्चापरं फलम् २२ ॥ इति श्रीब्रह्मवैवर्त्तपुराणे श्रावणीकृष्णक
मलानामैकादशीकथासंपूर्णा ॥ २३ ॥ श्रीयुधिष्ठिर उवाच ॥ श्रावणस्य सिते पक्षे का वा एकादशी भवेत् किंनामको विधिस्तस्याः एतद्विस्तरतो
वद १ यया कामो न वेत्स्यागर्णां सफलस्मारसाहरैः तस्या अमहिमानं वै कथयस्व जनार्दन २ ॥ श्रीकृष्ण उवाच ॥ शृणु त्वं राजशार्दूल कथां पापहरां पराम्
यस्याः श्रवणमात्रेण वाजपेयफलं भवेत् ३ श्रावणस्य सिते पक्षे पुत्रदा नाम नामतः सर्वेणैव विधानेन श्रीधरस्तत्र पूज्यते ४ पुरा च द्वापरे राजन् पुरी माहि
ष्मतीप्रति राजा महीजितो नाम राज्यं पालयते तदा ५ पुत्रहीनस्य तद्राज्यं तस्यैव न सुखप्रदम् पुत्रहीनं तदा राजन् शर्मनर्णानसफलं भवेत् ६ तथैव बहुपमं जंतिपित
रस्तोयमोत्तमम् कालं नित्यावसोपितः राजा चेद्धिहैः स्वमनोरथैः ७ बहुपायाः कृतास्तेन पुत्रस्योत्पादने तथा नाभूत्तस्य सुतो यस्मात्तं सा राज्ञा रये स्थितः ८ यौव

नेसमतीतंवैवदेवयस्मिँसोऽभवत् किंभविष्यति राज्यस्य पुत्रहीनस्य सांप्रतम् ९ इहजन्मनि किंचिद्वै न मया पातकं कृतम् अन्यायोपार्जितं द्रव्यं निहितं कोशे मया
नहि १० सुतवत्पालितो लोको महीधर्मेण पालिता दुष्टदंडो मया दत्तो मित्रे पुत्रे रिपौ तथा ११ शिष्टाः सुपूजिता राज्ये देवा वा पितृ यातकः इत्येवं पालिता
धात्री धर्मेणैव मयाऽखिला १२ कस्मात्पुत्रो मम गृहे नाभवद्द्विजसत्तमाः इति चिंतयतस्तस्य कुर्वतो राज्यमुत्तमम् १३ तदा तस्य प्रजाः सर्वा मतिं कृत्वा मनो
रमाम् तस्य राज्ञः अभीष्टार्थाय जग्मुर्गहने वने १४ वभ्रमुस्ता वने सर्वा दृष्ट्वा श्रेष्ठाश्रमान्वराः इत्थं च भ्रममाणास्ता ददृशुर्मुनिसत्तमम् १५ तप्यमानं तपो घोरं नि
राहारं निरूदकम् ब्रह्मतुल्यं जितात्मानं जितक्रोधं सुमानसम् १६ लोमशं नाम विमलं सर्वशास्त्रविशारदम् दीर्घायुष्यमनाधृष्यं तत्र नैकब्रह्मसंविदम्
१७ एकैकेनैवाब्दकल्पेन रोमाण्यस्य विशीर्यते इत्येवं लोमशं नाम त्रिकालज्ञं महामुनिम् १८ एवं दृष्ट्वा च ताः सर्वा जग्मुस्तस्य समीपकम् यथान्यायं प्रणा
मं च चक्रुस्तास्तस्य वै मुनेः १९ विनयावनता जाता ऊचुस्ताश्च परस्परम् अस्मद्भाग्यवशादेव प्राप्तोऽयं मुनिसत्तमः २० उपायश्च यथाकार्यं तथास्मान्सुनः
विष्यति ॥ प्रजा ऊचुः ॥ अयं तो मुनिश्रेष्ठ त्वत्स्माकं संकटं महत् २१ संशयच्छेदनार्थाय तव संनिधिमागताः ब्रह्मलोऽपि परस्त्वं हि लब्धः श्रे
ष्ठो न विद्यते २२ त्वत्समीपं समायाताः संशयच्छेदनाय च एतदाचक्ष्व नो ब्रह्मन् परस्त्वं हि न कथ्यते २३ ॥ श्रीलोमश उवाच ॥ किमर्थमिह सं
याताः किं कार्यं ब्रूत नो जनाः निःसंकटान्करिष्यामि भवतो वा हितेरतः २४ परोपकृतये लोके वयमत्रावस्थिताः ॥ प्रजा ऊचुः ॥ आगतास्त्वत्समीपं तु
कारणं वर्त्तते महत् राजा महीजितो ब्रह्मन्पुत्रहीनस्तु सांप्रतम् २५ वयं तु पालितास्तेन पुत्रवत्कर्त्रा महात्मना अस्माकं पितरः स्वामिन्केवलं जन्महेतवः
२६ तस्यैव तु सुतार्थाय त्वागता गहनं वनम् तस्य राज्ञो गुणैर्लीनास्तस्य दुःखेन दुःखिताः २७ इति कृत्वा मतिं स्वामिन्समायातास्तवांतिके तस्य भाग्य
वशादेव कार्यमत्र भविष्यति २८ प्राप्तश्चैव मुनिश्रेष्ठो लोमशो भगवानृषिः भवतः संयमेनात्र नेमिछिन्नं भविष्यति २९ तदुक्तं तत्तपोदानं संयमः कथ्य
तां पुनः येन विक्रियमाणेन पुत्रस्तस्य भवेद्ध्रुवम् ३१ ॥ श्रीकृष्ण उवाच ॥ इति तेषां वचः श्रुत्वा ध्यानं कृत्वा मितलोचनः प्रत्युवाच मुनिश्रेष्ठो ज्ञात्वा तस्
स्य च पातकम् ३२ ॥ लोमश उवाच ॥ सर्वजन्मनि तेनैव कृतं वै पातकं महत् सर्वजन्मनि वैश्योऽयं धनहीनोऽतिपापकृत् ३३ एवं वै भ्रममाणेन तु त
स्मिन्पापे दुरात्मनि ज्येष्ठमासे सिते पक्षे दशमीदिवसे तथा ३४ मध्यं प्राप्ते रवौ तत्र कापि धेनुः समागता तृषासंपीडिता त्यर्थं तत्काले तु प्रसूतिका
३५ वत्सेन सहिता चैव तोयार्थं समुपागता कूपिका तोयसंयुक्ता सा च तस्याः पयः पपौ ३६ पिबंतीं सा पयः धेनुर्वारिता तेन पापात्मना तृषापीडितदुष्टा
त्मा सर्वमापः स्वयं पपौ ३७ अशापत्तं तु सा धेनुर्जन्मवेऽग्रे मा प्रसूतिमान् कः गतो वैश्यस्तु स गृहं ज्वरदाहेन पीडितः ३८ तत्पापजदेहं गत्वा पापी शेषविधिवशात्तदा ते
न पुण्यप्रभावेन हि नृपः समजायत ३९ धेनुशापात्तु वंशहीनः प्राप्तराज्यमकंटकम् ॥ प्रजा ऊचुः ॥ अस्माभिः किं व्रतं ब्रह्मन्कर्तव्यं कथ्यते हितम् एतदाचक्ष्व नो
ब्रह्मन्येन पुत्रो भवेद्ध्रुवम् ४० ॥ श्रीलोमश उवाच ॥ श्रावणस्य सिते पक्षे पुत्रदा नाम नामतः तस्याः प्रयं व्रतं सर्वैः कुरुत तत्प्रभु राजसह ४१ तस्मै देयं हि यत्पुण्यं त
दा पुत्रो भविष्यति एवं श्रुत्वा तु तद्वाक्यं प्रणम्य द्विजसत्तमम् ४२ जग्मुस्ते स्वगृहान्सर्वे राज्ञार्थं व्रतमुत्तमम् श्रावणश्च समायातः शुक्लैकादशी तिथिः ४३ चक्रुस्ते

जातं श्रुतं तव ४९ ॥शौनक उवाच॥ कार्त्तिकस्यासिते पक्षे रमा नामेति विश्रुता तस्या उपोषणाद्विप्र जातं पुरमध्रुवम् ५० ध्रुवं भवेद्यथा तेनैव तत्कुरुष्व द्विजोत्त
म॥ सोमशर्म्मोवाच॥ केन व्रतप्रभावेन पुरं चैव भवति ध्रुवम् ५१ तत्त्वं कथय राजेंद्र तत्तथैव हि नान्यथा॥ शौनक उवाच॥ मुचकुंदस्य दुहिता चंद्रभागा शुभानना ५२
तस्याश्चैव चरित्रं तु तमिमं तत्र निवेदय सा कांता यत्करोत्येव ततस्तथा च भविष्यति ५३ इति श्रुत्वा तु तद्वाक्यं जगाम स तु तद्द्विजः कथयामास वृत्तांतं राजपुत्र्यास्तु तत्तदा ५४
श्रुत्वा सा द्विजवाक्यं तु विस्मयोत्फुल्ललोचना प्रत्यक्षमथवा स्वप्नं किमेतद्वद द्विजोत्तम ५५॥ सोमशर्म्मोवाच॥ दृष्टश्चैव मया भद्रे भर्ता हि तव शोभने इंद्रेण सदृशाप
म्नो दृष्टो सो नगरः शुभः ५६ भोक्तुं नेध्रुवं चैव त्वत्पुण्यप्रभावतः अध्रुवं तेन तत्रोक्तं ध्रुवं भवति तत्कुरु॥ चंद्रभागोवाच॥ तत्र मां नय भो विप्र पतिदर्शनलालसाम् आत्म
व्रतस्य पुण्येन करिष्यामि ध्रुवं पुरम् ५७ ज्ञाते चैव सह त्वं च लक्षं चैव ददामि ते मम तेन समं विप्र संयोगं कुरु चानघ ५८ इति श्रुत्वा वचस्तस्याः जगाम सह पुनर्वनम् तया सह विशालाक्ष्या
नो वैमंदिराचलम् ५९ वामदेवस्य च मुनेराश्रमस्तत्र वर्तते संयोगस्तत्र संजातो दैवयोगप्रभावतः ६० राजपुत्री चंद्रभागा ददर्श पुरमुत्तमम् द्वितीयमिंद्रतुल्यं तु अशुवर्णोपशोभितम् ६१
पतिं ददर्श सा बाला यथा चंद्रमनामयम् प्रत्युवाच ततः कांतं किमेतत्कारणं वद ६२ ॥शोभन उवाच॥ कार्त्तिकस्यासिते पक्षे रमा चैकादशी तिथिः तस्या व्रतप्रभावेन ध्रुवं भव
ति चानघे ६३ ॥चंद्रभागोवाच॥ शृणु कांत परं वाक्यं यत्पुण्यं मयि विद्यते तत्सर्वं त्वत्प्रसादेन निश्चलं वै करिष्यति ६४ बालिका च पुरी रम्या चातुर्वर्ण्योपशोभिता यथा मा रमते नृमी
जानीहि मां तथा विभो ६५ स्वयं धर्मपुरी रम्या मम पुण्याद्भविष्यति किमत्र बहुनोक्तेन दत्तं पुण्यं मयाखिलम् ६६ तस्याः पुण्यप्रभावेन सर्वपुण्यप्रभावतः सा भार्या स द्विजो राजा चिरं काले
वसंति हि ६७ ॥श्रीभगवानुवाच॥ एवं सा नृपशार्दूल रमते पतिना सह दिव्यान् भोगान् दिव्यरूपा दिव्याभरणभूषिता ६८ शोभनोपि तया सार्द्धं रमते दिव्यविग्रहः रमाव्र
तप्रभावेन मंदिराचलसन्निधौ ६९ चिंतामणिः समा ज्ञेया कामधेनुसमाथवा रमाभिधानं नृपते तवाग्रे कथितं मया ७० तथा तवाग्रे कथितं माहात्म्यं पापनाशनम् एकादशीव्रतानां
च पक्षयोरुभयोरपि ७१ यथा शुक्ला तथा कृष्णा विभेदं नैव कारयेत् सेविते कादशी नृणां भुक्तिमुक्तिप्रदायिनी ७२ धेनुः श्वेता तथा कृष्णा उभयोः सदृशं पयः तथैव तुल्यफलदे स्मृ
ते एकादशीद्वयम् ७३ तस्मात्सर्वप्रयत्नेन कर्त्तव्यं व्रतमुत्तमम् माहात्म्यश्रवणादस्याः सर्वपापैः प्रमुच्यते ७४॥ इति श्रीब्रह्मवैवर्त्तपुराणे कार्त्तिककृष्णा रमा नामैका
दशी कथा संपूर्णा॥ युधिष्ठिर उवाच॥ कृष्ण कृष्ण महाप्राज्ञ सर्वलोकहिताय च कथयस्व प्रसादेन शुक्लां कार्त्तिकसंभवाम् १ किं नाम को विधिस्तस्याः एतद्विस्तरतो व
द तेहासस्य च दासोस्मि नात्र कार्य्या विचारणा २॥ श्रीकृष्ण उवाच॥ कार्त्तिकस्य सिते पक्षे नाम्ना चैव प्रबोधिनी शृणु तस्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम् २ अश्वमेधादिकं पु
ण्यं समाप्नोति च मानवः तावद्गर्जति राजेंद्र गंगा भागीरथी क्षितौ ४ यावन्नायाति पापघ्नी कार्त्तिकी हरिबोधिनी अश्वमेधसहस्राणि राजसूयशतानि च ५ एकेनैवोपवासेन पापं दहति
बोधिनी दशम्यां संयमे स्थित्वा क्रोधमानविवर्जितः ६ एकादशीदिने प्राप्ते सर्वं तन्नियमं चरेत् स्नात्वा विष्णोर्जपं कृत्वा पूजयेच्च रमापतिम् ७ मंत्रेणानेन राजेंद्र देवमुत्थापयेत्प्रभुम् उ
त्तिष्ठोत्तिष्ठ गोविंद योगनिद्रां विहाय च समुत्थिते त्वयि विभो क्रियाः सर्वाः भवंति हि ८ तत्रैव देवदेवेशं स्वर्णवत्स्थापयेत्सुमान् महान्नृपैर्वरो राज्ञो भ्राजते मदनोपरि ९ उत्थिते देवदेवेशे न
गेरपार्थिवस्त्वयम् दीपद्योतकरे मार्गे नृत्यगीतजनाकुले १० देवं दामोदरं प्रेक्ष्य स्थितं धरणीधरम् स्वयं च प्रभवेत्कस्ते राजन्मुक्तेन पः शुचिः ११ स्वदेशे वा राजराजेंद्र जनैर्गानं प्रकारयेत् रा
त्रौ जागरणं कार्य्यमेकादश्यां सुरालये १२ प्रभाते विमले स्नात्वा नानापुष्पैर्विष्णुमर्चयेत् होमयेद्व्याहृतिहविर्भिर्घृतादिभिः १३ ततो विप्रान् शुचिः स्नात्वा भोजयेदन्नविस्तरैः क्षीरै

शिहृतैः होडैः कमारगुडमोरकैः १४ अर्चयेच्चंदनैः पुष्पैः धूपगंधैर्द्विजोत्तमान् शास्त्रोक्तविधिना राजन् भोजयेद्भगवत्प्रियान् १५ विप्रेभ्यश्च ततो दत्वा स्वशक्त्या चावचनेप्सितम् गावो हिरण्य
वासांसि भक्ष्यान्नं चतुर्गुणम् १६ जलं मलं तथा कंदं पत्रं पुष्पं फलादिकम् चतुरो वार्षिकान्मासानेवं कृत्वा हि यो नरः स नरः पापनिर्मुक्तो ह्यनंतफलमाप्नुयात् १७ अवसाने च राजेंद्र वासुदेवपुरीं व्र
जेत् एवं यः कुरुते राजन् प्रबोधिन्याः व्रतं शुभम् १८ विष्णुतुल्यः स विज्ञेयो नात्र कार्या विचारणा शृणोति ध्यायते स्तोति त्रिहोत्रा श्रावयेत्तु नो १९ हरिभक्तिकरः पार्थ स गच्छेद्वैष्णवं पदम् धर्मार्थ
कामभोक्षाणां तेषां च सगतिर्भवेतात् २० दुग्धाब्धौ भोगशयने भगवाननंतो यस्मिन्दिने स्वपिति चाथ विबुध्यते वा तस्मिन्ननन्यमनसा मुपवासभाजां पुंसां ददाति सुगतिं गरुडांगसंगी २१ ॥ इति
श्रीभविष्योत्तरपुराणे कार्तिकीशुक्लाप्रबोधिनीनामैकादशीकथा संपूर्णा ॥ ॥ अथाधिकमासैकादशीकथा ॥ श्रीयुधिष्ठिर उवाच ।
भगवन् श्रोतुमिच्छामि व्रतानामुत्तमं व्रतम् सर्वपापहरं चैव फलं सुकृतिनामपि १ पुरुषोत्तममासस्य कथां ब्रूहि जनार्दन को विधिः किंफलं तस्य को देवस्तत्र पूज्यते २ अधिमासे तु तं
नामव्रतं ब्रूहि जनार्दन कस्य दानस्य किं पुण्यं किं कर्तव्यं नृभिः प्रभो ३ कथं स्नानं च किं जाप्यं कथं पूजाविधिः स्मृतः किं भोज्यमुत्तमं चान्नं मासे वै पुरुषोत्तमे ४ ॥ श्रीकृष्ण उवाच ।
कथयिष्यामि राजेंद्र भवतः स्नेहकारणात् अधिमासे तु संप्राप्ते भवेदेकादशी तु या ५ कमलानाम सा नाम्नेति तिथीनामुत्तमा तिथिः तस्याश्चैव प्रभावेन कमलाभिमुखी भवेत् ६ ब्राह्मे मु
हूर्ते चोत्थाय स्मृत्वा तं पुरुषोत्तमम् स्नात्वा चैव विधानेन नियमं कारयेद्व्रती ७ गृहे त्वेकगुणं जाप्यं नद्यां तु द्विगुणं स्मृतम् गवां गोष्ठे दशगुणमग्न्यागारे दशाधिकम् ८ शिवक्षेत्रेषु ती
र्थेषु देवतानां च सन्निधौ सहस्रशतकोटीनामनंतं विष्णुसन्निधौ ९ अवंत्यामभवत्कश्चिच्छिवशर्मा द्विजोत्तमः तस्य पंचाभवन्पुत्राः कनिष्ठो दुष्कृतोऽभवत् १० तदा पित्रा परि
त्यक्तस्य क्तः स्वजनैर्बांधवैः विकर्मणः प्रभावेन गतो दूरतरं वनम् ११ एकदा दैवयोगेन तीर्थराजं समागमत् क्षुत्क्षामदीनवदनस्त्रिवेण्यां स्नानमाचरत् १२ क्षुधीणमाश्रमा
स्तत्र विचिन्वन्क्षुधयार्दितः हरिमित्रमुनेस्तत्र चाश्रमं च ददर्श ह १३ मासे पुरुषोत्तमे चैव जनानां च समागमे यत्राश्रमे कथयतां कथां कल्मषनाशिनीम् १४ मासे पुरुषोत्तमे
वत्साश्च हृत्या कमला श्रुता एकादशी पुण्यतमा भुक्तिमुक्तिप्रदायिनी १५ जयशर्मा एतां श्रुत्वा कमलां पापनाशिनीं व्रतं कृतं च तैः सार्धं स्थित्वा स्वस्त्यालयेत्तदा १६ निशीथे सम
तुष्टा से कमला तत्र समागता वरं ददामि ते विप्र कमलायाः प्रभावतः १७ ॥ श्रीविप्र उवाच ॥ का त्वं कस्यासि रंभोरु प्रसन्ना च कथं मम ऐंद्री त्वमिंद्रदेवस्य भवानी शंकरस्य च १८
वह्नेर्वा चंद्रसूर्यस्य गांधर्वी किन्नरी तथा त्वत्सदृशी न दृष्टा च न श्रुता च मया नने १९ ॥ श्रीलक्ष्मीरुवाच ॥ प्रसन्नास्म्यद्य संजाता वैकुंठाद्दहमागता प्रेरिता हरिदेवे
न चैकादश्याः प्रभावतः २० पुरुषोत्तमस्य मासस्य कृष्णपक्षे तु सा भवेत् कमला नाम संप्रोक्ता कमलां दातुमागता २१ पुरुषोत्तमस्य मासस्य पक्षे प्रथमे भवेत् तस्या
व्रतं त्वया चीर्णं प्रयागे मुनिसन्निधौ २२ व्रतस्यास्य प्रभावेन वशगाहं न संशयः तव वंशे भविष्यति मानवा द्विजसत्तम २३ लभ्यंते मत्प्रसादं च सत्यं ते वाकृतं मया ॥ विप्र उ
वाच ॥ प्रसन्ना यदि मे पद्मे व्रतं विस्तरतो वद २४ यत्कथामुपवर्तंते सज्जना येन नारदिताः ॥ श्रीलक्ष्मीरुवाच ॥ श्रोतव्यं परमं श्राव्यं पवित्राणामनुत्तमम् २५ दुःस्वप्न
नाशनं पुण्यं श्रोतव्यं यत्नतस्ततः उत्तमः श्रवणात्पुण्यः श्लोकं श्लोकार्धमेव वा २६ पठित्वा मुच्यते सद्यो महापातककोटिभिः मासानां परमो मासः पक्षिणां गरुडो यथा २७
नदीनां च यथा गंगा तिथीनां द्वादशी तिथिः अद्यापि निर्जराः सर्वे भारते जन्मलिप्सवः २८ नमर्दं यंति विबुधा नारायणमनामयम् ये यजंति सदा भक्त्या नारायणमनामयम् २९
तानर्चयंति सततं ब्रह्माद्या देवतागणाः ये पि नामपरा येव हरिकीर्तनतत्पराः ३० हरिपूजापरा ये च ते कृतार्था कलौ युगे पुंक्ते वा यदि वा कुर्ज्जे भवे देकादशीद्वयम् ३१ गृहस्था

नोंचसर्वांचयतीनाभुजराल्सना एकादशीद्वादशीचराविशेषेत्रयोदशी ३२ तत्रक्रतुशतं पुण्यं त्रयोदश्यां तु पारणे एकादश्यां निराहारः स्थित्वाहमपरेऽहनि ३३ भोक्ष्यामि पुंड
रीकाक्ष शरणं मे भवाच्युत अमुं मंत्रं समुच्चार्य देवदेवस्य चक्रिणः ३४ भक्तिभावेन तुष्टात्मा चोपवासं समर्पयेत् देवदेवस्य पुरतो जागरं नियतो व्रती ३५ गीतैर्नृत्यैश्च वाद्यैश्च
पुराणपठनादिभिः ततः प्रातः समुत्थाय द्वादश्यां विसेव्रती ३६ स्नात्वा विष्णुं समभ्यर्च्य विधिवत्संयतेंद्रियः पंचामृतेन संस्नाप्य चैकादश्यां जनार्दन ३७ द्वादश्यां च पयःस्नानं ह
रेः सारूप्यमश्नुते अज्ञानतिमिरांधस्य व्रतेनानेन केशव प्रसीद सुमुख नाथ ज्ञानदृष्टिप्रदो भव ३९ एवं विज्ञाप्य देवेशं देवदेवं च चक्रिणम् ब्राह्मणान्भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षि
णाम् ४० ततः स्वबंधुभिः सार्द्धं नारायणपरायणः कृत्वा पंचमहायज्ञान् स्वयं भुंजीत वाग्यतः ४१ एवं यः प्रयतः कुर्यात्पुण्यमेकादशीव्रतम् स याति विष्णुभवनं पुनरावृत्तिदुर्लभम्
४२ इत्युक्ता कमला तस्मै प्रसन्ना तस्य वंशजान् सोपि विप्रधनी भूत्वा पितुर्गेहं समागमत् ४३ एवं यः कुरुते राजन् कमलाव्रतमुत्तमम् शृणुयाद्वा स्मरेद्विष्णोः सर्वपापैः प्रमुच्यते
४४ ॥ इति श्रीब्रह्मांडपुराणे पुरुषोत्तममासे कृष्णा कमलानामैकादशीकथा संपूर्णा ॥ श्रीयुधिष्ठिर उवाच ॥ श्रुतानि वर्णधर्माणि व्रतानि च ज
गत्प्रभो एकादशी समं किंचिन्न श्रुतं तेन वै जनार्दन १ पुनस्त्वेकादशीं ब्रूहि पापघ्नीं पुण्यदायिनीम् यां कृत्वा मनुजो लोके प्राप्नोति परमं पदम् २ ॥ श्रीकृष्ण उवाच ॥ शुक्ले वा यदि
वा कृष्णे यदा चैकादशी न वेत् नेत्याज्या चैव राजेंद्र मोक्षसौख्यविवर्द्धनी ३ एकादशी कलौ राजन् भवबंधविमोचनी कामदा सर्वकामानां पापानां पापहा नृप ४ रविवारेथ मांगल्ये सं
क्रांतौ वा नृपोत्तम एकादशी सदा पोष्या पुत्रपौत्रविवर्द्धनी ५ उपवासं नरैर्देवि केन त्याज्यं विष्णुवल्लभैः आयुःकीर्तिप्रदं नित्यं पुत्रपौत्रविवर्द्धनम् ६ मोक्षदं धनदं राजन् नित्यमेका
दशीव्रतम् ये कुर्वंति महीपाल व्रतमेकादशीं वलम् ७ यथोक्तविधिना लोके ते नरा विष्णुरूपिणः जीवन्मुक्ता नरा राजन्नेह संप्ते न संशयः ८ ॥ श्रीयुधिष्ठिर उवाच ॥ जी
वन्मुक्ताः कथं कृष्ण विष्णुरूपाः कथं हरे पापरूपाश्च दृश्यंते परे कौतूहलं हि मे ९ ॥ श्रीकृष्ण उवाच ॥ ये राजन्नरलोके च निर्जलं व्रतमुत्तमम् कुर्वंति वै नराः पुण्याः पक्षे पक्षे ध्रु
वं सदा १० सर्वपापहरं पुण्यं व्रतमेकादशीसमम् न किंचिद्विद्यते राजन् सर्वकामप्रदं नृणां ११ दशम्यामेकभुक्तं च ह्येकादशी च निर्जला द्वादशीं समुपोष्यंति ते नरा विष्णुरूपिणः १२ अथवा
वा नयस्तु कुरुते कामदा या व्रतोत्तमम् वांछितं लभते सोपि इहलोके परत्र च १३ पवित्रा पावनी ह्येषा महापातकनाशिनी भुक्तिमुक्तिप्रदा चैव कर्तॄणां नृपसत्तम १४ पुरुषोत्तममोदेनो
सां रजनी यो विधानतः पुष्पैर्धूपादिभिश्चैव नैवेद्यैर्मंडपैस्तथा १५ रजनी यो विधानेन श्रद्धाभक्तिसमन्वितैः कांस्यं मांसं मसूरान्नं चणकान्कोद्रवांस्तथा १६ शाकं मधुपरान्नं
च पुनर्भोजन मैथुने वैष्णवो व्रतकर्त्ता च दशम्यां दश वर्जयेत् १७ द्यूतं क्रीडां तथा निद्रां तांबूलं दंतधावनम् परापवाद पैशुन्यं स्तेयं हिंसां तथा रतिं १८ क्रोधाद्यनृतवाक्यं च
एकादश्यां विवर्जयेत् कांस्यं मांसं मसूरांश्च तैलं वितथभाषणम् १९ व्यायामं च प्रवासं च पुनर्भोजन मैथुने वृषपृष्ठं परान्नं च द्वादश्यां च विवर्जयेत् २० अनेन
विधिना राजन् विहिता येन कामदा रात्रौ जागरणं कृत्वा पूजितः पुरुषोत्तमः २१ सर्वपापविनिर्मुक्तास्ते यांति परमां गतिम् पठनाच्छ्रवणाद्राजन् गोसहस्रफ
लं लभेत् २२ ॥ इति श्रीभविष्योत्तरपुराणे धिकमासशुक्ला का[illegible]नामैकादशीकथा संपूर्णा ॥ २६ ॥

ननमोज्ञयेश्ग
वक्त्वाशिपेत्तुयः